# साहित्यम्
# काव्यादर्शः (उपमाचक्रान्तः)

**१. इष्टदेवताप्रार्थना-**

''मंगलादीनि मंगलमध्यानि मंगलान्तानि च शास्त्राणि प्रथन्ते''-''निर्विध्न समाप्ति कामो मंगलमाचरेत्'' इत्याप्त वचनानुसारेण काव्यादर्शकारेण महाकविना दण्डिना इष्टदेवतायाः सरस्वत्याः प्रार्थनारूपं मंगलाचरणं प्रस्तूयते शिष्य शिक्षायै यथा-

**चतुर्मुखमुखाम्भोजवनहंसवधूर्मम।**
**मानसे रमतां नित्यं सर्वशुक्ला सरस्वती।।**

चतुर्मुखो ब्रह्मा तस्य मुखानि एवं अम्भोजानि तेषां वनें हंसवधूः हंसीव सर्वतः श्वेता विद्याधिष्ठात्री देवता सरस्वती नित्यं मम ग्रन्थकारस्य तन्मुखने सर्वस्य शिष्यस्य जगतों वा एकीभूते मानसे रमतां प्रतिपूर्वक वसतु।

अयमाशयः- काव्यलक्षण प्रपश्चरूपस्य अस्य काव्यादर्शग्रन्थस्य रचनायै तत्परस्य आचार्यस्य कृते इदमेवावश्यकं वस्तुप्रतीयते यत् तस्य चित्ते मानसे वा सर्वथा दोषरहिताया वाण्या निवासः स्यात्।

अस्मिन् श्लोके सर्वशुक्लेति विशेषणं विलोक्य विद्यागर्विता विज्जिकानाम्नी महती राज्ञी कथयास यत्-

**नीलोत्पलदलश्यामां विज्जिकां माम जानता।**
**वृथैव दण्डिना प्रोक्तं सर्वशुक्ला सरस्वती।।**

**२. प्रतिज्ञावाक्यम्-**

**सिद्धार्थं सिद्धसंकल्पं श्रोतुं श्रोता प्रवर्तते।**
**ग्रन्थादौ तेन वक्तव्यः सम्बन्धः सप्रयोजनः।।**

इति वचनानुसारेण ग्रन्थस्य प्रारम्भे अनुबन्ध चटुष्टयं कथनीयं भवति- अधिकारी विषयः सम्बन्धः प्रयोजनञ्च काव्यस्वरूप जिज्ञासुः अधिकारी, काव्य स्वरूपम् प्रतिपादनीयों विषय काव्यस्वरूप ज्ञानं प्रयोजनम् प्रतिपाद्य-प्रतिपादकरूपः सम्बन्धः अर्थात्

लक्षणं द्विप्रकारकं भवति स्वरूपलक्षणं तटस्थलक्षणश्च तथा परब्रह्म- स्वरूपलक्षणन्तु-सच्चिदानन्दं ब्रह्म तथा तटस्थलक्षण्-जन्माद्यस्य यतः। तदनुसारेण प्रतिज्ञां करोति यत्-

**पूर्वशास्त्राणि संहृत्य प्रयोगानुपलक्ष्य च।**
**यथासामर्थ्यमस्माभिः क्रियते काव्यलक्षणम्।।**

पूर्वेषां शिलालिभरतादीनानाम् आचार्याणाम् यानि नाट्यसूत्रादीनि शास्त्राणि सन्ति तेषां संक्षेपेण अर्थतः संग्रहं कृत्वा, वाल्मीकि व्यास-कालिदासादीनां ग्रन्थेषु लक्ष्य रूपाः यं खलु प्रयोगाः सन्ति तेषां महत्या खलु सूक्ष्मेक्षिकया निपुणतापूर्वकं समालोचनां कृत्वा यथाशक्ति विनम्रतापूर्वक काव्यलक्षणम् अर्थात् काव्यपरिचायकं स्वरूपलक्षणं प्रस्तौमि। लक्ष्यते ज्ञायते स्वरूपम् अनेनेति लक्षणम्।

पूर्वशास्त्राणि संहृत्य-प्रयोगानुपलक्ष्य चेति कथनेन प्रतीयते यदत्र ग्रन्थे कथिताः पदार्थाः न केवलेन लक्षणेन एवं अनुमोदिताः प्रत्युत लक्ष्यानुसारिणाऽपि सन्ति।

**३. लोकयात्राप्रवर्तनम्-**

अस्मिन् संसारे त्रिविधा वाचः समुपलभ्यन्ते

संस्कृताः प्राकृता देश्यश्च। तत्र प्रथमाः पाणिनि-प्रभृतिभिः आचार्येः प्रकृतिप्रत्ययविभागादिमुखेन अनुशिष्टाः, द्वितीया वररूचिना कृतानुशासना शिष्टाश्च देशभाषाः। एता एव वाच आधारीकृत्य देवादिपामरान्तं समस्तमेतद् विश्वम् उच्चावचम् सकलं व्यवहारं करोति, वाचाम् अभावे कोऽपि स्वस्य अभिप्रायं बोधयितुं न शक्नोति इदमेव लक्ष्यीकृत्य कथयति यत्-

**इह शिष्टानुशिष्टानां शिष्टानामपि सर्वथा।**
**वाचामेव प्रसादेन लोकयात्रा प्रवर्तते।।**

उत्तमाः संस्कृतेन मध्यमाः प्राकृतेन तथा अधमाः देशभाषा माध्यमेन सर्वे खलु व्यवहारं कर्तुं शक्नुवन्ति अर्थात् लोकयात्राया प्रवर्तनाय वाणीकृपा परमावश्यकी यथोक्तञ्च वाक्यपदीयकारेण भर्तृहरिणापि-

**न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।**
**अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते।।**

इत्थं शब्दानां सर्वव्यवहारसाधनत्वम् अन्वयमुखेनोक्तम् व्यतिरेक मुखेन यथा-

**४. शब्दमहत्त्वम्-**

**इदमन्धन्तमः कृत्स्नं जायेत भुवनत्रयम्।**
**यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते।।**

यथा-सूर्यादीनां ज्योतिषामभावे सर्वे पदार्थाः अन्धकारेण व्याप्ता लुप्ता इव भवन्ति तथैव शब्द नामकस्य ज्योतिषः अभावे सर्वोऽपि लोक व्यवहारो न संभवेत्

शब्द व्यवहाराभावे लोकोऽयमन्ते तमसीव, निमग्नो विलुप्तसकल व्यवहारश्च भवत्। ज्योतिर्द्योतनात्। वृहदारण्यकोपनिषदपि-वाचेवायं ज्योतिषा आस्ते।

५. काव्यदर्शेति नाम सार्थक्यम्

**आदिराजयशोविम्बमादर्शं प्राप्य वाङ्मयम्।**
**तेषामसन्निधानेऽपि न स्वयं पश्य नश्यति।।**

कवेर्भावः कर्म वा काव्यम्, काव्यमेव आदर्श इति काव्यादर्शः। प्राचीन काले ये खलु दिलीपादयः राजानः बभूवु तेषां यथोरूपम् विम्बम् छायात्मकं प्रतिरूपम् कर्तृभूतम्, कर्मभूतम् वाङ्मयम् आदर्शम् दर्पणं प्राप्य साम्प्रतमपि तेषा नृपाणाम् शरीरैः सह उपस्थितेरभावेऽपि नैव नश्यति इति स्वयमेव साक्षात् अनुभवनीयम् अयमाशयः- सोऽयं काव्यादर्शः तस्माद् दर्पणात् विलक्षण एव यतः किमपि अस्माकं मुखादिकं विम्बान्तरम् आदर्शे प्रति विम्बितं भूत्वा तावदेव प्रकाशते यावत्कालपर्यन्तम् तत् तत्र तिष्ठति, विम्बस्य अपगमे सति प्रति विम्बस्यापि अपगमः परन्तु यशोविम्बम् काव्यात्मकं दर्पणं प्राप्य सदैव प्रतिविम्ब सृष्टिं करोति अर्थात्

रामादयो राजानः साम्प्रतम् यशः शरीरेण अस्माकं मध्ये रामायणादिकाव्यरूपेण जीवन्तीव तम् काव्यादर्शं विलोक्य समालोक्य समनुभूय च आधुनिकः समाजः स्वस्वजीवन निर्माणं कर्तुं शक्नुयात् यथोक्तञ्च

नास्ति येषां यथः काये जरामरणजम् भयम्।

अत्र लौकिकस्य आदर्शस्य अपेक्षया काब्यादर्शस्य विलक्षणता प्रतिपादिता एतेन काव्य कर्तुः काव्य तत्त्व ज्ञस्य च यशः प्रभृतीनि काव्यप्रयोजनानि प्रतीयन्ते-

किं बहुना काव्यतत्त्वानि अतिविस्तृतानि अतः न सरलतया ग्रहीतुं शक्यानि परन्तु काव्यादर्श प्रतिबिम्बितानि मुष्टिमेयानीव यथोक्तञ्चपि-

**एष साहित्यमातंगो दुर्ग्राह्योऽति महत्तरः।**
**मुष्टिमेय इवाभाति दर्पणे प्रतिविम्बितः।।**

**६. निर्दोषायाः वाचः प्रयोगाय यतनीयम्-**

**गौर्गौः कामदुधा सम्यक् प्रयुक्ता स्मर्यते बुधै;।**
**दुष्प्रयुक्ता पुनर्गोत्वं प्रयोक्तुः सैव शंसति।।**

एकः शब्दः सम्यग् ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके च कामधुग् भवतीति महाभाष्य वचनानुसारेण निर्दोषतया गुणालंकारादिपूर्णतया य वाणी प्रयुज्यते तदाा सा कामधेनुसदृशी सर्वफलदात्री भवति परन्तु सैव यदि दुष्प्रयुक्ता भवति अर्थात् स्वर-वर्ण-मात्रादीनां विगुणतया प्रयोगः क्रियते तर्हि सा वाणी दुष्टप्रयोग कर्तुः कंवेः वक्तुश्च गोत्वम् बलीवर्दत्वम् मूर्खत्वं वा प्रकटयति निष्कर्षतः वाणीप्रयोगे दोषाणां त्यागाय गुणानाञ्च संग्रहाय एवं सर्वदा सर्वथा प्रयतनीयम्

दोषाणां विशेषेण हेयत्व प्रतिपादनं सदृष्टान्तं प्रस्तूयते दण्डिना यथा-

**तदल्पमपि नोपेक्ष्यं काव्ये दुष्टं कथञ्चन।**
**स्याद्वपुः सुन्दरमपि श्वित्रेणैकेन दुर्भगम्।।**

वाक्यं रसात्मकं काव्यम् तस्य च काव्यात्मभूतस्य रसस्य अपकर्षका ये खलु पद-पदांशादिगताः दोषाः प्रपानकरसास्वादे सिकताकणायमानाः सहृदयानां हृदयेषु उद्वेगं जनयन्ति तेषु अल्पमपि दुष्टं काव्ये उपेक्षायोग्यं न भवति अर्थात् त्याज्यमेव

ननु एकोहि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवां कस्तदा तत्परिहाराय प्रयासः किमर्थ इति चेत् न, आह महाकविर्दण्डी सदृष्टान्तं यत् यथा सुविभक्त सुगठित सर्वांगशालितया समुचित वेषभूषादिपरिष्कृततया च अतिरमणीयमपि शरीरम् कुत्रापि अंगविशेषे

अवस्थितेन श्वेतकुष्ठेन दुर्भगं भवेत् तथैव एकेनापि दोषेण सकलमेव काव्यं निन्दापात्रं भवेत् यथोक्तञ्च भामहेनापि-

**सर्वथा पदमप्येकं न निगाद्यमवद्यवत्।**
**विलक्षणा हि काव्येन दुःसुतेनेव निन्द्यते।।**

८. शास्त्रज्ञानस्य आवश्यकता-

**गुणदोषानशास्त्रज्ञः कथं विभजते जनः।**
**किमन्धस्याधिकारोऽस्ति रूपभेदोपलब्धिषु।।**

दोषाणा परित्यागः गुणानाञ्च संग्रहः करणीयः परन्तु ते ज्ञाताः सन्त एवं हेया उपादेयाश्च भवितुं शक्नुवन्ति तच्च हानोपादानज्ञानं एकेन शास्त्रेण एवं सम्भवति अत एव आह ग्रन्थकारः-

साहित्यशास्त्रमेव गुणदोष परियायकम्, तेन साहित्यशास्त्रज्ञानेन शून्यो जनः गुणदोषविभागं कथमपि कर्तुं न शक्नोति। यः खलु अन्ध ाे भवति स पदार्थानाम् रूपस्य श्वेतपीतादिरूपो यः भेदों भवति तस्य उपलब्धियु परिज्ञानेषु समर्थो न भवति किं बहुना तत्र न तस्य अधि ाकारलेशोऽपि।

अयमाशयः- यथा चक्षुरिन्द्रिय विकलो जनो रूपमेदान् श्वेतपीतादीन् अवधारयितुम् असमर्थो भवति तथैव साहित्यशास्त्रज्ञानेन शून्यो जनः गुणदोष विभागे अशक्तो भवति निष्कर्षतः साहित्यशास्त्रं सप्रयोजनम्।

**अत एव विदुषां प्रवृत्तिर्वर्णिता दण्डिना-**
**अतः प्रजानां व्युत्पत्तिमभिसन्धाय सूरयः।**
**वाचां विचित्रमार्गाणां निबबन्धुः क्रियाविधिम्।**
**तैः शरीरं च काव्यानामलंकाराश्च दर्शिताः।।**

## १. काव्यस्वरूपनिरूपणम्-

संस्कृतकाव्यजगति काव्यस्य शरीरं स्वरूपं लक्षणं वा समादाय महती विचार परम्परा प्रचलिता तत्र प्रायेण पक्ष द्वयम्-शब्दार्थ युगलस्य काव्यत्वं स्वीकुर्वन्तः तथा रमणीयार्थ प्रतिपादक शब्दस्य काव्यत्वं मन्यमानाः सन्ति। शब्दार्थ युगलपक्षपातिनों यथा-

भामहः - शब्दार्थौं सहितौ काव्यम्
वामनः - काव्य शब्दोऽयं गुणालंकारसंस्कृतयोः शब्दार्थयोर्वर्तते।
रूद्रटः - शब्दार्थौं काव्यम्
मम्मटः - तददोषौ शब्दार्थौं सगुणावनलंकृती पुनः क्वापि
आनन्दवर्धनः - शब्दार्थ शरीरन्तावत् काव्यम्
हेमचन्द्रः - अदोषौ सगुणौ सालङ्कारौ च शब्दार्थौं काव्यम्
वाग्भटः - शब्दार्थो निर्दोषौ सगुणौ प्रायः सालङ्कारौ च काव्यम्
विद्याधरः - शब्दार्थो वपुरस्य तत्र विबुधै-रात्माऽभ्यधायि ध्वनिः

परन्तु क्लेशभीरवः सुकुमारमतयः राजकुमारादयः एवं सरलतया शिक्षणीया भवेयुरत एव

गुडजिह्किया शिशू निवौषधम्' इति न्यायेन तेषामुपदेशाय एव काव्ये शब्दस्य मनोहारी अर्थः अपेक्षित आसीत्।

शनैः शनैः विचारपरम्परा परिवर्तिता तथा वाग्व्यवहारे शब्दस्यैव प्रधानता भवतीति विचार्य अर्थोपस्कृतः शब्द एवं काव्यम् इति स्वीकृतवन्तः।-

रमणीयार्थ प्रतिपादकः शब्दः काव्यम् इति पण्डितराजो जगन्नाथः

निर्दोषा लक्षणवती सरीतिर्गुण भूषणा।
सालंकाररसानेकवृत्तिर्वोक्काव्यनाम भाक्।। जयदेव

इतः पूर्वं बहवः शब्दमात्र काव्यता वादिनो यथा-

अग्निपुराणाम्-संक्षेपाद् वाक्यमिष्टार्थ-
व्यवच्छिन्ना पदावली काव्यम्

शौद्धोदनिः- रसादिमद् वाक्यं काव्यम्।

दण्डी-शरीरं तावदिष्टार्थ व्यवच्छिन्ना पदावली

विश्वनाथः-वाक्यं रसात्मकं काव्यम्।

इत्येवं प्रकारेण पक्षद्वये तावत् काव्यलक्षण मादांय मौलिको मतभेदो वर्तते।

वस्तुतस्तु वाग्व्यवहारस्तु शब्दस्यैव भवति अतः दण्डिसम्मतमेव काव्यस्वरूपम् रमणीयम्

यदिअर्थस्यापि काव्यत्वं स्यात् तु-

कामिनी व्यावहरति-नीरसतरूरिह विलसति पुरतः इत्यादि वाक्यं काव्यं कथ्यते तथैव स्त्री ब्रूते, शुष्को वृक्षस्तिष्ठत्यग्रे इत्यादिकमपि वाक्यं काव्यं स्यात्, अर्थस्तु उभयत्र तुल्य एव परन्तु रमणीयस्य इष्टार्थस्य अभावत्वात् न काव्यम् अत एवाह-दण्डी-

शरीरं तावदिष्टार्थ व्यवच्छिन्ना पदावली

११. **काव्यभेदाः**

**गद्यं पद्यं च मिश्रं च तत् त्रिधैव व्यवस्थितम्।**
**पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा।।**

दण्डिमतेन सर्वप्रथमं काव्यस्य त्रयो भेदा भवन्ति-गद्यं पद्यम् मिश्रञ्च।

(क) गद्य लक्षणम्-

गद्यते स्वाभाविकरूपेण स्वाभिधेयस्य अभीष्टस्य अर्थस्य बोधनाय लोकैः उश्चार्यते इति गद्यम्।

साहित्य दर्पण कारमतेन-

**वृत्त गन्धोज्झितं गद्यम् मुक्तकं वृत्तगन्धि च।**
**भवेदुत्कलिकाप्रायं चूर्णकञ्च चतुर्विधम्।।**
**आद्यं समासरहित वृत्तभागयुतं परम्।**
**अन्यद् दीर्घ समासाढयं तुर्यं चाल्पसमासकम्**

**मुक्तकोदाहरणं यथा-**

गुरूर्वचसि पृथुरूरसि अर्जुनो यशसि।

**वृत्तगन्धि यथा-**

समरकण्डूयन निविडभुजदण्ड कुण्डीकृत कोदण्ड-
शिञ्जिनीटंकारोज्जागरित वैरिनगर

अत्र कुण्डलीकृत कोदण्ड इति अनुष्टुब्वृत्तस्य गन्धोऽनुभूयते।

**उत्कलिकाप्रायम्-यथा-**

वन्दारू वृन्दारक वृन्द शिरः सुमस्यन्दमान मकरन्द बिन्दुवन्घमान चरण युगल चारूता धरीकृत लीला लिप्यमान-काश्मीरज द्रवदर विकसदरविन्दानाम्।

**चूर्णकं यथा-**

गुणरत्नसागर जगदेक नागर कामिनीमदन जनरञ्जन।

**(ख) पद्यलक्षणम्**

पादम् श्लोक चरणमर्हतीति पद्यर्म अर्थात् चतुर्भिः पादैः निबद्धम् भवति।

वस्तुतस्तु चतुष्पदी पद्यमिति उपलक्षणम् तेन पद्यस्य चरणानां संख्या न नियता अतएव विश्व विदिता गायत्री त्रिपादयुक्ता किं बहुना षट्पदी वृत्तमपि प्रसिद्धम्। पद्यस्य भेयद्वयम् यथा

**पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा।**
**वृत्तमक्षर संख्यातं जातिर्मात्रा कृता भवेत्।।**

वृत्तम्- (१) समवृत्तम्-स्रग्धरादिकम्
(२) अर्धसमम्-पुष्पिताग्रादिकम्
(३) विषमवृत्तम्-वैतालीयादिकम्

मात्राकृता जातिः- आर्यादिका

**(ग) मिश्रकाव्यलक्षणम्–**

गद्यपद्यो भयमिलितम् मिश्र काव्यम्। नाटकचम्पूप्रभृतयो भेदा अत्रायान्ति।

दृश्यश्रव्यत्व भेदेन पुनः काव्यं द्विधामतमिति केचिदाचार्याः कथयन्ति।

पुनश्च छन्दो विचितिनामकः छन्दोग्रन्थः। छन्दांसि विचीयन्ते लक्षणत उदाहरणतो भेदप्रभेदतश्च निरूप्यन्ते यस्यां सा छन्दोविचिति तत्र सर्व एवं छन्दो विस्तरः सम्यक् निरूपितः। यथा सागरपारं जिगमिषुर्जनः नावमवलम्बते तथैव छन्दोविवेकज्ञानाय छन्दः शास्त्रमेव परिशीलनीयमिति गदितं दण्डिना–

**छन्दो विचित्यां सकल स्तत् प्रपञ्चोः निदर्शितः।**
**सा विद्या नौस्तितीर्षूणां गभीरं काव्यसागरम्।।**

किं बहुना–

**मुक्तकं कुलकं कोषः संधात इति तादृशः।**
**सर्गबन्धांशरूपत्वादनुक्तः पद्य विस्तरः।।**

मुक्तकम्–मुक्तकं श्लोक एवैकश्चमत्कारक्षमः सताम् यथा अमरूशतकादिः।

**कुलकम्–द्वाभ्यां तु युग्मकं सन्दानितकं त्रिभिरिष्यते।**
**कलापकं चतुर्भिश्च पञ्चभिः कुलकं मतम्।।**

यथा तत्र तत्र काव्यादौ वर्णनविशेषः

कोषः–

**कोषः श्लोकसमूहस्तु स्यादन्योन्यानपेक्षकः।**
**व्रज्याक्रमेण रचितः स एवाति मनोरमः।।**

यथा–आर्या सप्तशत्यादिः।

संधातः–

यत्र कविरेकमर्थं वृत्तेनैकेन वर्णयति काव्ये संघातः स निगदितः।

यथा–वृन्दावन–मेघदूतादिः। इत्यलम्

**१४. महाकाव्यलक्षणम्–**

**सर्गबन्धो महाकाव्यम्–उच्यते तस्य लक्षणम्।**
**आशीर्नमस्क्रिया वस्तु निर्देशों वापि तन्मुखम्।।**

महाकाव्यमित्युद्देश्य पदम्, सर्गबन्ध इति

विधेयम्–

महाकाव्यस्य प्रारम्भः आशीर्वादेन नमस्कारेण वस्तु निर्देशेन वा भवति– आशीर्वादेन यथा–

क–स्वेष्टजन शुभाशंसनम्–

**श्रियं क्रियाद्यस्य सुरागमे नमत्–**
**सुरेन्द्र नेत्र प्रतिविम्बलाञ्छिता।**
**सभा बभौ रत्नमयैर्महोत्पलैः**
**कृतोपहारेव स वोऽग्रजो जिनः।।**

अत्र जिनः स्वेष्टजनानां श्रियं कुर्यादिति स्वेष्टजन शुभाशंसनम्।

शुभाशंसनम्–

**पूतं स्वतः पूततरं ततो**
**गांगं पयः शंकरमौलिसंगात्।**
**तत्पातु मातुः प्रणयापराध–**
**पादाहतैः पूततमं ततो नः।।**

पूतं-पूततरं पूततमञ्च गंगाजलं पातु-शिवार्णवे।
नमस्कारेण यथा-

**वागर्थाविव सम्पृक्तौ वागर्थ प्रतिपत्तये।**
**जगतः पितरौ वन्दे पार्वती परमेश्वरौ।।**

अत्र रघुवंशे कालिदासः पार्वतीपरमेश्वरयोः
नमस्कारात्मकं मंगलाचरणं प्रस्तौति।
वस्तु निर्देशेन यथा-

**अस्त्युत्तरस्यां दिशि देवतात्मा**
**हिमालयो नाम नगाधिराजः।**
**पूर्वापरौ तोयनिघी वगाह्य**
**स्थितः पृथिव्या इव मानदण्डः।।**

कुमार संभवमहाकाव्ये कालिदासः हिमालयरूपं वस्तु निर्दिशन् मंगलाचरणं प्रस्तुतवान्।
महाकाव्यस्य उपजीव्यवर्णनम्

**इतिहासकथोद् भूतमितर द्वा सदाश्रयम्।**
**चतुर्वर्गफलायत्तं चतुरोदात्तनायकम्।।**

इति इत्थं ह निश्चयेन आस बभूवेति इतिहासः रामायण महाभारतादिः तत्र वर्णितां कथामाधारी कृत्य उपजीव्य वा प्रबद्धं भवेत् इतरच्च राजतरंगिण्यादि। सदाश्रयम् अर्थात् सताम् आपामर प्रसिद्धानाम् सताम् बुद्धादीनां कथामाश्रित्य प्रवृत्तम्
यथा-अश्वघोषकृत बुद्धचरितादि।
चतुर्वर्ग फलायत्तम् अर्थात् धर्मार्थ-काममोक्षाणां फलरूपेण प्राप्तिः स्यात् इति उद्देश्येन एवम् प्रणीतम् भवेत् यथा-रामायणादि
पुनश्च व्यवहारकुशलः चतुरः
उदात्तश्चनायको भवेत् यत्र तत् महाकाव्यम्
महाकाव्ये वर्ण्यवस्तु निर्देशनम्-

**नगरार्णव शैलर्तु चन्द्रार्कोदयवर्णनैः।**
**उद्यानसलिलक्रीडामधुपानरतोत्सवैः।।**

शिशुपालवधस्य तृतीयसर्गे द्वारका वर्णणम्
समुद्र वर्णनम् रघुवंशत्रयोदशसर्गे।
कुमारसंभवस्य प्रथमसर्गे हिमालयवर्णनम्
तथा शिशुपालवधस्य चतुर्थे सर्गे रैवतकपर्वत-वर्णनम्। तत्रैव षष्ठे सर्गे ऋतुवर्णनम्
शिशुपालवध एवं चतुर्थेसर्गे
रैवतक पर्वतवर्णन प्रसंगे सूर्योदयं चन्द्रस्य चास्तंगमनं वर्णयित्वा माघो घण्टामाघतां गतः

**उदयति विततोर्ध्वरश्मिरज्जा-**
**वहिमरूचौ हिमधाम्नि याति चास्तम्।**
**बहति गिरिरयं विलम्बिघण्टा-**
**द्वयपरिवारितवारणेन्द्रलीलाम्।।**

इत्येवं प्रकारेण उद्यान-जलक्रीडा-मधुपान-रतोत्सवादीनामपि वर्णनं महाकाव्ये विधीयते।

**विप्रलम्भैर्विवाहैश्च कुमारोदयवर्णनैः।**
**मन्त्रदूतप्रयाणाजिनायककाभ्युदयैरपि।।**

यत्र तु रतिः प्रकृष्टा नाभीष्टमुपैति विप्रलम्भोऽसौ पूर्वराग-मान-प्रवास-करूणात्मतया चतुर्विधो भवति-

पूर्वरागो नैषधीय चरिते चतुर्थसर्गे

मानो यथा कृष्ण वैभवे रामायाः

प्रवासो यथा कृष्णवैभव एवं

करूणो यथा कादम्बर्यां महाश्वेतायाः

विवाहो यथा रघुवंशे अजेन्दुमत्योः

कुमारोदयः रघुवंश तृतीयसर्गे

मन्त्रो यथा शिशुपालवध द्वितीय सर्गे

दूतोऽपि त्रिविधः-

निसृष्टार्थः- उद्योगपर्वणि वासुदेवः

मितार्थः- रामायणे अंगदः

सन्देशहारकः कादम्बर्या केयूरकः।

विजय यात्रा-रघुवंश चतुर्थसर्गे

युद्धम-किरातार्जुनीयस्य पञ्चदशसर्गे

नायकोन्नति र्यथा शिशुपालवधे कृष्णस्य विजयः

इत्थं प्रकारके र्वर्णनैर्युक्तं महाकाव्यं शोभते सर्वेषाम् नावश्यकत्वम्-केचनापि अंशाः वर्णनीयाः।

**वर्ण्यवस्तुयोजना**

**अलंकृतमसंक्षिप्तं रसभावनिरन्तरम्**
**सर्गैरनतिविस्तीर्णैं श्रव्यवृत्तैः सुसन्धिभिः।।१८।।**

नागरादारभ्य पुत्रोत्पत्ति पर्यन्तम् कथितानां वस्तुजातानां वर्णनैः अलंकृतं महाकाव्यं भवति तत्र योजना वर्ण्यते यथा-

असंक्षिप्तम्-

वसुदेवात् समुत्पद्य पूतनां विनिपात्य च।
कंसं हत्वा द्वारिकायामुषित्वा स्वर्गतो हरिः।।

कृष्णचरितं खलु अतिसंक्षिप्तं न शोभते रोचते वा।

श्रृंगारादयो रसाः तथा देवादिविषयकभावाः अपि निरन्तरा भवेयु सर्गा अतिविस्तृता न भवेयुः येन पाठकानां सामाजिकानां वा अरूचिः संजायते

वृत्ताति छन्दांसि तावत् श्रवण योग्यानि तथा हतवृत्त दोषरहितानि भवेयुः।

काव्यशास्त्रे मुखं प्रतिमुखं गर्भ विमर्श उपसंहृति निवर्हणम् वेति पञ्च सन्धयो भवन्ति तैरपि सुसंयोजितं महाकाव्यं भवति।

**सर्वत्र भिन्नवृत्तान्तैरूपेतं लोकरञ्जकम्।**
**काव्यं कल्पान्तरस्थापि जायते सदलंकृति।।१६।।**

पूर्वन्तावत् महाकाव्यस्य लक्षणं कृतम् अत्र तावत् महाकाव्यस्य प्रशंसां कुर्वन् दण्डी तस्य निर्माणे प्रवृत्तिम् प्रदर्शयति यत्-

काव्यं लोकरञ्जकं भवति कल्पावसान पर्यन्तमपि तिष्ठति अतः कविभिः तस्य निर्माणे सावधानता रक्षणीया।

सम्पूर्णलक्षणलक्षितत्वाभावो न न्यूनत्वम्-

**न्यूनमप्यत्र यैः कैश्चिदंगै काव्यं न दुष्यति।**
**यद्युपात्तेषु सम्पत्तिराराधयति तद्विदः।।२०।।**

संस्कृत काव्य जगति दण्डिप्रभृतिभिः आचार्ये काव्यस्य महाकाव्यस्य वा लक्षणानि प्रस्तुतानि तेषु यानि अंगानि लक्षणीयानि भवन्ति तेषां सर्वेषां समग्रतया समावेशो न भवेत्तदापि न कोऽपि दोषः।

यदि येषां वर्णनं क्रियते तेन च प्रस्तुतस्य रसस्य परिपोषो भवति तदा वर्णनीयानां न्यूनत्वमपि विदुषां नोद्वेगकरम् भवति।

नायक-प्रतिनायकयोः वर्णन क्रम निरूपणम्-

**गुणतः प्रागुपन्यस्य नायकं तेन विद्विषाम्।**

**निराकरण मित्येषः मार्गः प्रकृति सुन्दरः।।२१।।**

यथा रामायणे गुणकथनमुखेन नायकस्य रामस्य पूर्वम् उपन्यासः ततः प्रतिनायकस्य रावणस्य वर्णनम् ततश्च तस्य हननम् वर्णितम् येन अयम् उपदेशः प्राप्यते यत्-

रामादिवत्, प्रवर्तितव्यम्-न रावणादिवत्

२२. **वंशवीर्यश्रुतादीनि वर्णयित्वा रिपोरपि।**
**तज्जयान्नायकोत्कर्षकथनञ्च धिनोति नः।।**

नायक वर्णनात् पूर्व प्रतिनायकस्य वंशम् पराक्रमं श्रुतादीनि च वर्णयित्वा ततः तादृशस्यापि प्रतिनायकस्य नायक द्वारा उच्छेदः कृतः इति वर्णनं नायकस्य एव उत्कृष्टतां प्रकटयति येन च सहृदयानां हृदयेषु परमानन्दानुभूतिः।

इत्थं महाकविना दण्डिना

महाकाव्यस्य लक्षणं सांगोपांगतया निरूपितम्।

२३. **गद्यनिरूपणम्-**

अपादः पदसन्तानों गद्य माख्यायिका कथा। इति तस्य प्रभेदौ द्वौतयोराख्यायिका किल।।

गणमात्रा नियमितः पद्यचतुर्थांशः पादो भवति यथोक्तञ्च

ज्ञेयः पादश्चतुर्थोऽशः। तस्माद् भिन्नः गणमात्रानियमनियन्त्रणरहितः पदसमूह एवं गद्यम्। तस्य भेद द्वयम् आख्यायिका कथा च-

२४. **आख्यायिका-कथाभिन्नताकथनम्-**

**नायकेनैव वाच्यान्या नायकेनेतरेण वा।**
**स्वगुणा विष्क्रिया दोषो नात्र भूतार्थशंसिनः।।**

प्राचीनमतेन आख्यायिकायाम् ..............................

नायकः स्वकथां स्वमुखेन कथयति तथा कथायाम् नायकः तस्मात् अन्योवा कोऽपि जनः कथां कथयंति अतः कथा।

स्वगुणाविष्कृतिं कुर्या-

दभिजातः कथञ्जनः

इति भामह वचनानुसारेण आत्मप्रशंसा न शोभना श्रेयस्करी च इति शंकायाम् कथयति दण्डी यत्-

स्वस्य वास्तविकानां वर्तमान-गुणानां वर्णनं न खलु, आत्मप्रशंसा भवति। अवर्तमान गुणानां वर्णनमेव आत्मप्रशंसा भवति। वस्तुसद् गुणकथनम् न नूनम् आत्म प्रशंसा नायकस्य इति-

प्राचीनमतखण्डनम्-

**अपित्वनियमो दृष्टस्तत्राप्यन्यैरूदीरणात्।**
**अन्यो वक्ता स्वयंवेति कीदृग् वा भेदलक्षणम्।।२५।।**

दण्डिमतेन प्राचीनभिमतं आख्यायिका कथा भिन्नता कथनं न समीचीनं यतः

स्वरूपविलक्षणताकथनमेवानयोर्भेदकम्-वक्तृविलक्षणताकथनं न भेदकं व्यावहारिकञ्च।

वक्त्रा पवक्त्रच्छन्दो निवेशादि कृतस्य भेदस्य निराकरणम्-

**वक्त्रं चापवक्त्रञ्च सोच्छ्वासत्वञ्च भेदकम्।**
**चिन्हमाख्यायिकायाश्चेत् प्रसंगे न कथास्वपि।।२६।।**

प्राचीनाचार्यैः कथाख्यायिकयोः भेदाय इयं व्यवस्था कृता यत् आख्यायिकायां परिच्छेदा उच्छ्वासशब्देन व्यवहारे आयान्ति तथा कथायाम् लम्भकादिशब्देन। एवमेव आख्यायिकायाम् आर्याच्छन्दः कथायाञ्च वक्त्रम् अपवक्त्रञ्चेति छन्दोव्यवहारो भवति

परन्तु एतत् न युक्तिसंगतम् यतः भेदचिन्हमेतत् कथावत् आख्यायिकायामपि भवितुं शवनोति-अनेन भेदेन वस्तुभेदों न भवितुं शक्नोति। कथानिर्माणे प्रवृत्तः कविर्यदि एषां चिन्हानां प्रयोगं करोति स एव कविर्यदि आख्यायिकायामपि भिन्नचिन्ह्प्रयोगं कुर्यात् तु अनेन अनयोर्न किञ्चिदन्तरं भवेत्।

अयमाशयः घट कलश रूपसंज्ञाभेदेन घटरूपस्य संज्ञिनः भेदः न प्रतीयते। रूपभेदो हि घटपटयोः भेदकः, न तु संज्ञाभेदः, संज्ञाभेदेऽपि घटकलशयोः अभिन्नता भवत्येव।

**आर्यादिवत् प्रवेशाब्दिं न वक्त्रापवक्त्रयोः।**

**भेदश्च दृष्टोलम्भादिरूच्छ्वासो वाऽस्तु किं ततः।।२७।।**

कथा वक्त्रापक्त्ररहिता एव स्यात् इत्यर्थः स्पष्टतया न केनापि उक्तः एवमेव लम्भादि कृतो भेदोऽपि अयुक्त एव।

निष्कर्षतः-

**तत् कथाऽऽख्यायिकेत्येका जाति संज्ञा द्वयांकिता।**

**अत्रैवान्तर्भविष्यन्ति शेषा श्चाख्यान जातयः।।**

घटकलशवत् संज्ञा भेदेऽपि कथाऽऽख्यायिकयोरपि संज्ञाभेदेऽपि गद्यकाव्य रूपे वाच्यार्थे न किमपि अन्तरम्

एवमेव-

**आख्यायिका कया खण्डकथा परिकथातथा।**

**कथालिकेति मन्यन्ते गद्यकाव्यञ्च पञ्चधा।।**

इति गद्यप्रबन्धा अपि आख्यायामेव अन्तर्भविष्यन्ति।।

परमत खण्डनम्-

**कन्याहरणसंग्रामविप्रलम्भोदयादयः।**

**सर्गबन्धसमा एव नैते वैशेषिका गुणाः।।२६।**

हत्वा छित्त्वा भित्त्वा च क्रोशन्ती रूदतीं हठात्।।

प्रसह्य कन्या हरणं राक्षसो विधिरूच्यते।।

इत्येवं लक्षणं कन्याहरणम्।

समरः त्रिप्रकारः-समः विषमः समविषमश्च

तत्र समयुद्धम् द्विप्रकारकम्-

द्वन्द्वयुद्धम् राम रावणयोः

चतुरंगयुद्धम्-कुरूपाण्डवानाम्

विषमसमरो यथा-रामस्य खरदूषण त्रिशिरोभिः सह।

समविषमो यथा-किरातार्जुनीये महेश्वरार्जुनयोः

विप्रलम्भः-यत्र रतिः प्रकृष्टा नाभीष्ट मुपैति

विप्रलम्भोऽसौ स च पूर्वरागः मानः प्रवासः करूणात्मकः इति चतुष्प्रकारकः

सूयौचन्द्रमसोः नायकस्य वा अभ्युदयः एते गुणाः महाकाव्यसदृशाः

एषां वर्णनं आख्यायिकामात्र एव न क्रियते किन्तु पद्यप्रबन्धेऽपि तस्मात् एतत् भेदकथनम् न समुचितम्। यतः-

**कविभावकृतं चिन्हमन्यत्रापि न दुष्यति।**

**मुखमिष्टार्थसंसिद्धौ किं हि न स्यात् कृतात्मनाम्।।३०।।**

कृतिनः कवयः येन केनापि शब्द प्रयोगेण स्वकीयस्य अभीस्य अर्थस्य मंगलादिकस्यसिद्धिं कुर्वन्ति। तेषां वाणीपूजायां तावदेतावत् सामर्थ्य भवति यत् ते येन केनापि शब्देन अभीष्टमर्थ साधयन्त्येव।

मिश्रकाव्यनिरूपणम्-

**मिश्राणि नाटकादीनि तेषामन्यत्र विस्तरः।**

**गद्यपद्यमयी काचिच्चम्पूरित्यभिधीयते।।३१।।**

नाटकादीनि दृश्यकाव्यानि गद्य पद्यात्मकतया मिश्राणि तेषां नाट्यशास्त्रादौ विस्तरः कृतोऽस्ति। तत्र गद्यपद्यप्रचुरा मिश्ररचनाकाचित् चम्पू कथ्यते यत-

गद्यपद्यमयी राजस्तुतिर्विरूदमुच्यते। मिश्रकाव्यं यथा-नृसिंह चम्पूः दशकण्ठवधम् च।

भाषाभेदेन काव्यस्य चतुर्विधत्वम्-

**तदेतद्वाड्मयं भूयः संस्कृतं प्राकृतन्तथा।**

**अपभ्रंशश्च मिश्रञ्चेत्याहुरार्याश्चतुर्विधम् ।।३२।।**

संस्कृतं प्राकृतम् अपभ्रशः मिश्रञ्चेति

काव्यस्य भेदचतुष्टयं भाषाभेदेन भवति

संस्कृतादि पद निर्वचनम्-

**संस्कृतं नाम दैवीवागन्वाख्याता महर्षिभिः।**
**तद् भवस्तत् समोदेशीत्यनेकः प्राकृतक्रमः।।३३।**

देवैः देवकल्पैर्मनुष्यैर्वा व्यवहारयोग्या यास्क पाणिन्यादिभिः महर्षिभिः प्रकृति-प्रत्ययादि प्रदर्शनेन व्याख्याता वाणी संस्कृतमिति कथ्यते।

तद्भवः संस्कृतादुत्पन्नः प्राकृतरूपः हत्त-कण्णप्रभृतिकः।

तत्समः संस्कृतसमः संस्कृतात् अभिन्न रूपो वा-कीरः गौः इत्यादिरूपः

देशी-तस्मिन् देशे रूढः यथा-गजार्थे-दोघ्घटः।

पुनश्च प्राकृता ग्राम्याः तै र्व्यवहारयोग्यम् प्राकृतम् अथवा प्रकृतेः संस्कृतात् उत्पन्नं समागतं वा प्राकृतम् इत्यपि कथयन्ति।

प्राकृत भाषासु प्रकर्षापकर्षौ-

**महाराष्ट्राश्रयां भाषां प्रकृष्टं प्राकृतं विदुः।**
**सागरः सूक्तिरत्नानां सेतुबन्धादि यन्मयम्।।३४।।**

यथा सागरे महार्धा मणयो भवन्ति तथैव महाराष्ट्र भाषा निबद्धे सेतुबन्धादौ काव्यविशेषे चमत्कारिका उक्तयः बहुलतया प्राप्यन्ते अहः महाराष्ट्रदेशीयं प्राकृतम् सर्वोत्कृष्टम् प्रवरसेनकृतं सेतुबन्ध काव्यम्। आदिपदेन सत्तसई-प्रभृति-काव्रचनानां ग्रहणम्। यथोक्तञ्च-

**सतसइया के दोहरे ज्यों नाविक के तीर।**
**देखन में छोटे लगे घाव करे गम्भीर।।**
**निष्कर्षत प्राकृतप्रधानं महाराष्ट्र प्राकृतम्।**
**भाषाभेदेन प्राकृत भेदकथनम्-**
**शौरसेनी च गौडी च लाटी चान्या च तादृशी।**
**याति प्राकृतमित्येव व्यवहारेषु सन्निधिम्।।३५।।**

शूरसेनः कृष्णमातामहः तेन शासितः भूखण्डः शूरसेनः मथुरानिकटे तस्य जनतया प्रयोगयोग्या शौरसेनी-लाटश्च कर्णाटक सन्निहितः देशः लाटजनप्रिया लाटी।

**बंगसमीपवर्ती गौडप्रदेशः-गौडजन प्रिया गौडी।**
**मागध्यवन्तिजा प्राच्या शूरसेनार्धमागधी।**
**बाह्लीका दाक्षिणात्या च सप्त भाषाः प्रकीर्तिताः।।**
**इत्थां सर्वा एव प्राकृत भाषारूपेण व्यवहार योग्याः।**

अपभ्रंश भाषानिरूपणम्

**आभीरादिगिरः काव्येष्ववभ्रंश इति स्मृताः।**
**शास्त्रेषु संस्कृतादन्यदपभ्रंशतयोदितम्।।३६।।**

आभीरा गोपाः तदादयः शबरशक

चाण्डालादयः तै र्व्यवहारयोग्याः भाषा अपभ्रंशवाच्याः काव्ये-व्याकरणशास्त्रे विरूद्धम् च्युतसंस्कृतित्वम् अर्थात् संस्कृतभिन्नं सर्वमेव अपभ्रंशकाव्यम् म्लेच्छ द्वारा प्रयोग योग्यम्-

यथोक्तञ्च पतञ्जलिना-

''ब्राह्मणेन न म्लेच्छितवैनापभाषितवै, म्लेच्छो हवा एष यदपशब्दः, म्लेच्छा मा भूम इत्यध्येयं व्याकरणम्'' महाभाष्यम्-१-१-१

भाषा भेदेन पद्यप्रबन्धव्यवथापनम्-

**संस्कृतं सर्गबन्धादि प्राकृतं स्कन्धकादि च।**
**ओसरादिरपभ्रंशो नाटकादि तु मिश्रकम्।।३७।।**

महाकाव्य खण्डकाव्यादिकं संस्कृत भाषयामेव विरच्यते न अन्यस्याम् यथा-रामायणादि।

स्कन्धकः छन्दोविशेषः तैर्विरचितम् काव्यमपि स्कन्धकम् प्राकृतभाषायामेव। यथा सेतुबन्धादि।

ओसरो नामापि छन्दोविशेष, तैर्विरचित काव्यम् अपभ्रंशभाषायामेव करणीयम् यथा कर्णपराक्रमादि।

नाना भाषाभिः मिश्रितं नाटकादि तु मिश्रकं काव्यम्।

वृहत्कथा स्वरूपम्

**कथा हि सर्वभाषाभिः संस्कृतेन च बध्यते।**
**भूतभाषामयीं प्राहुरद्भुतार्थां वृहत्कथाम्।।३८।।**

सर्वप्रकाराभिः प्राकृत भाषाभिः संस्कृतभाषया च कथा रचना भवति कथायां भाषानियमो नास्ति संस्कृतमयी कथा यथा-कादम्बरी।

परन्तु भूत-पिशाचभाषा निबद्धाः कथा वृहत्कथा गुणाढय विरचिता। इयं मूलरूपेण न लभ्यते तस्या एव अनुवादरूपेण वृहत्कथामञ्जरी कथा सरित्सागरादयः ग्रन्थाः प्राप्ता भवन्ति।

लास्यादि भेद निरूपणम्-

**लास्यच्छलितशम्यादिप्रेक्षार्थम् इतरत् पुनः।**
**श्रव्यमेवेति सैषाऽपि द्वयीगतिरूदाहृता।।३९।।**

स्त्रीनृत्यंलास्यम्-पुंनृत्यं छलितम्

**शम्पा द्विकला कार्या तालो द्विकल एव च।**
**पुनश्चैककला शम्पा सन्निपातः कलात्रयम्।।**

पुरूषेण समारब्धं नृत्यं ताण्डवमुच्यते।

**मण्डलेन तु यत् स्त्रीणां नृत्यं हल्लीशकन्तु तत्।**
**तत्रनेता भवेदेको गोपस्त्रीणां यथा हरिः।।**

एतत् सर्वं प्रेक्षार्थम्-अर्थात् अवलोकनमात्र फलम् दृश्यकाव्यम्।

इतरत् सर्व श्रव्यं श्रवणमात्र फलम् श्रोत्रयोरेव सुखदम्

एषा द्वयी गतिः प्राचीनैः कथिता दृश्यश्रव्यत्व भेदेन

पुनः काव्यं द्विधा मतम्।।

रीतिसूत्र संसूचनम्-

**अस्त्यनेको गिरां मार्गः सूक्ष्मभेदपरस्परम्।**
**तत्र वैदर्भगौडीयौ वर्ण्येते प्रस्फुटान्तरौ।।४०।।**

महाकवीनां वाणीमार्गः अनेक प्रकारकः अस्ति अर्थात् कवि परम्परया रीयते गम्यते अनया पद्धत्या इति सा रीतिः। पद संघटना रीतिः अर्थात् अस्माकं शरीरे यथा हस्तपादीनाम् अंगानां यथास्थानं संस्थानमेव शोभाजनकं भवति तथैव पदानामपि संघटनं यथास्थानं रसोपकारकं लोकोपस्कारकं वा भवति।

अयं रीतिरूपःमार्गः सूक्ष्मभेदयुक्तः वैदर्भी गौडी पाञ्चाली लाटी च।

किं बहुना सरस्वती कण्ठाभरणे षड्विधाः रीतयः वर्णिताः

विदर्भजन प्रियत्वात् वैदर्भी माधुर्ययुक्ता।

गौडजन प्रियत्वात् गौडी-ओजोयुक्ता

पञ्चालजनप्रियत्वात् पाञ्चाली समस्त पञ्चष पदा

लाटजन प्रियत्वा च्चलाटी वैदर्भी पाञ्चालीमध्यपातिनी।

श्लेषादि गुणनिरूपणम्-

**श्लेषः प्रसादः समता माधुर्यं सुकुमारता।**
**अर्थव्यक्तिरूदारत्वमोजः कान्तिसमाधयः।।४१।।**
**इति वैदर्भमार्गस्य प्राणा दश गुणाः स्मृताः।**
**एषां विपर्ययः प्रायो दृश्यते गौड वर्त्मनि।।४२।।**

श्लेषादि गुणगणशालिनी रचना वैदर्भी
तथा गौडमार्गे एषां गुणानां विपरीतता अर्थात् क्वचित् अत्यन्ताभावः कुत्रचिच्च
अंशतः सम्बन्धः । एते दश गुणा यथा-

**१. श्लेष लक्षणम्-**

शिलिष्टमस्पृष्टशैथिल्मल्पप्राणाक्षरोत्तरम्। शिथिलंयत्र वाक्ये शिथिलो वर्णविन्यासो न भवति तद् वाक्यं शिलष्टम्। वर्गाणां प्रथम-तृतीय-पञ्चमा यरलवाश्च ये अल्पप्राणाः वर्णा ते उत्तरा प्रधाना यत्र तदपि शिथिलम्। उदाहरणं यथा-

मालतीमाला लोकालिकलिला यथा

अत्रोदाहरणे संयोगरहितानाम् अल्पप्राणवर्णानां मकार-ककार-लकारादीनां बहुलता अत अत्र शैथिल्यम्।

अत्रायं विशेषः-

अनुप्रासधिया गौडैस्तदिष्टं बन्धगौरवात्।
वैदर्भैर्मालतीदाम लंधितं भ्रमरै रिति।

शिथिलता गौडेभ्यो रोचते यतस्ते अनुप्रास प्रेमिणः। वैदर्भ मार्गाय न रूचिकरः अतः श्लेषगुणयुक्तत्वम् अतिप्रियम्।

श्लेषोदाहरणं यथा-

मालती दाम लंघित भ्रमरैः।

अत्र संयुक्तानां महाप्राण वर्णानां यकारादीनाम्
बहुलता अतः श्लेषगुणः।

प्रसादगुणलक्षणम्-

प्रसादवत् प्रसिद्धार्थम्

यत्र उभयार्थक शब्दस्य अप्रसिद्धे अर्थे प्रयोगो भवति तदा निहतार्थ दोषः। तस्य वारणाय यत्र प्रसिद्धार्थस्य पदस्य प्रयोगः तत्र झटिति अर्थस्य प्रतीतिर्भवति। शुष्केन्धने अग्निवत् निर्मले वस्त्रे जलवत् अर्थः सहृदयानां हृदयेषु झटिति अनुभूयते। स प्रसादनात् प्रसादगुणः उदाहरणं यथा- इन्दोरिन्दीवरद्युति

**लक्ष्म लक्ष्मीं तनोतीति प्रतीति सुभगं वचः।।४५।।**

अत्र इन्दीवरादयः शब्दा प्रसिद्धेषु अर्थेषु प्रयुक्ता अतः श्रवणमात्रेण एव अर्थबोधका अतः प्रसादगुणः।

अत्रायं विशेषः-

**व्युत्पन्नमिति गौडीयै र्नातिरूढमपीष्यते।**
**यथानत्यर्जुनाब्जन्मसदृक्षाङ्को वलक्षगुः।।**

गौडदेशवासिभिः न अतिप्रसिद्धमपि व्युत्पत्ति युक्तम् वाक्यं काव्यत्वेन स्वीक्रियते अर्थात् एतद् वाक्यं प्रसादगुणरहितम् अतो न काव्यमिति गौडा न मन्यन्ते। यदि बन्धस्य गाढत्वम् अतः प्रसादगुणस्य राहित्यम् पुनरपि काव्यत्वं स्वीकुर्वन्ति यथा-

अन्त्यर्जुनाब्जन्स सदृक्षाङ्कों वलक्षगुः।

अत्र अर्जुनशब्दः कार्तवीर्य-तृतीय पाण्डवयोः प्रसिद्धः, श्वेते तु निहतार्थः।

अब्जन्म शब्दः कमलार्थे अवाचकः

सदृक्षशब्दः अधिकपदत्वदोष युक्त श्रुतिकटुरपि च तथा वलक्षगुः अप्रयुक्तदोषदूषितः

एवं विध दोष युक्तऽपि रचना व्युत्पन्ना
अव यवार्थादिना अर्थबोधिका अतः
गौडा आदरं कुर्वन्ति।

**समता लक्षणम्**

**समं बन्धेष्वविषमं ते मृदुस्फुटमध्यमाः।**
**बन्धा मृदुस्फुटोन्मिश्रवर्णविन्यासयोनयः।।४७।।**

यत्र काव्य बन्धेषु वाक्यम् अविषमम् अर्थात् यादृशः प्रारम्भे तादृश एव समाप्तौ तत्र समतानामको गुणैः

बन्धानां भेदा यथा-

मृदु कोमलः स्फुटः, विकटः मध्यमः तदुभयमिश्रः। इत्थम् मृदुतायोनिः विकटतायोनिः मिश्रवर्णयोनिः इति त्रिविधा समता-

क्रमेणोदाहरणानि यथा-

क-मृदुतायोनिर्यथा-

कोकिकालाप वाचालो मामेति मलयानिलः। अत्र मृदु बन्धेन प्रारब्धस्य सन्दर्भस्य तेनैव मृदुना बन्धेन समापनात् मृदुतायोनिः।

ख-विकटतायोनिर्यथा-

उच्छलच्छीकराच्छाच्छ निर्झराम्भः कणोक्षितः।

अत्र विकटतया प्रारम्भ स्तेनैव समापनात् विकटतायोनिः

ग-मिश्रवण योनिर्यथा

चन्दनप्रणयोद्गन्धि मन्दो मलयमारूतः।।

अत्र प्रारम्भे स्फुटो विकटो वा बन्धः

चरमे च मृदुः इति मिश्रबन्धता

अत्रायं विशेषः-

**स्पर्धते रूद्धमद्धैर्यो वररामामुखनिलैः।।४६।।**
**इत्यनालोच्य वैषम्यमर्थालंकारडम्बरौ।**
**अपेक्षमाणा वबृधे पौरस्त्या काव्यपद्धतिः।।५०।।**

स्पर्धत इत्यत्र अंशे विकटबन्ध स्तथा वररामेति अंशे मृदुबन्धः। गौडा कवयः केवलस्य अनुप्रासस्य अनुरागिणः विषमगुणामपि रचनाम् बहु मन्यन्ते। वैदर्भास्तु अर्थरूपे अंशे विशेषध्यानयुक्ता अनुप्रासं न बहु मन्यन्ते अतः बन्ध विषमतायां न सहमताः काव्यत्स्वीकाराय।

**माधुर्यगुण लक्षणम्**

**मधुरं रसवद् वाचि वस्तुन्यपि रसस्थितिः।**
**येन माद्यन्ति धीमन्तो मधुनेव मधुव्रताः।।५१।।**

रसवत् सरसं वाक्यं मधुरम् - एतेन रसो माधुर्यम् इति तयोः अभेदज्ञानम् भवति माधुर्य गुणस्य रसात्मकत्वम् यतः-

वाचि शब्दे वस्तुनि चार्थे रसस्थितिः व्यञ्जकतया सम्बन्धः तेन रसव्य ञ्जकवर्णयुक्तं वाक्यं काव्यम्-

यथा भ्रमरा मधुव्रता अतः मधुना पुष्परसेन एव आनन्दम् अनु भवन्ति तथैव बुद्धिमन्तः सहृदया अपि रसेन एव मत्तमत्ता भवन्ति अर्थात् लोकोत्तराह्लादरूपं रसमनु भवन्ति तदेव माधुर्यम् श्रुति साम्येन माधुर्यम्-

**यया कयाचिच्छ्रुत्या यत् समानमनुभूयते।**
**तद्रूपा हि पदासत्तिः सानुप्रासा रसावहा।।५२।।**

यया कयाचित् कण्ड्यया तालव्यया अन्यया वा श्रुत्या उच्चारेण यत् समानम् पूर्वोच्चारित सदृशम् अनुभूयते तत्र-वृत्त्यनुप्रासः रसपोषकरो भवति यथा-

**एष राजा यदालक्ष्मीं प्राप्तवान् ब्राह्मणप्रियः।**
**तदा प्रभृति अर्थस्य लोकेऽस्मिन्नुत्सवोऽभवत्।।५३।।**

अत्र एष राजा इत्यत्र अंशे षकार-रेफौ मूर्धन्यौ, जकार-यकारौ तालव्यौ, यदालक्ष्मीम् इत्यत्र दकार लकारौ दन्त्यौ तथा अन्यत्र अपि ते ते वर्णाः समानस्थानीया इति स्थान साम्यात् श्रुत्यनुप्रासः

अत्रायं विशेषः

**इतीदं नादृतं गौडैरनुप्रासस्तु तत्प्रियः।**
**अनुप्रासादपि प्रायो वैदर्भैरिदमिष्यते।।५४।।**

गौडा श्रुत्यनुप्रासं प्रति न आदरयुक्ता

परन्तु अनुप्रास एव तेषां प्रियो भवति।

तस्य तदेव हि मधुरं यस्य मनो यत्र संलग्नम्

इत्यनुसारेण गौड-वैदर्भ मार्गानुसारिणाम् रूचिभेद एवं निबन्धम्।

**वर्णानुप्रास लक्षणम्-**

**वर्णावृत्तिरनुप्रास पादेषु च पदेषु च।**
**पूर्वानुभवसंस्कारबोधिनी यद्यदूरता।।५५।।**

श्लोकस्य चतुर्थः भागः पादः कथ्यते तथा सुप्तिङन्तं पदं भवति। पादेषु पदेषु च वर्णस्य वर्णयो र्वर्णानाम् वा आवृत्तिः पुनः पुनरूच्चारणम् वर्णानुप्रासः भवति।

वर्णावृत्तिः समीपस्था एवं चमत्कारकारिणी भवति, न तुदूरस्था अत एव आह यत् पूर्वोच्चारण विषयस्य वर्णस्य यः खलु श्रावणप्रत्यक्षरूपः अनुभवः भवति तस्मात् यः भावना-विशेषरूपः संस्कारो भवति तस्य बोधिका या द्वितीय वर्णादीनाम् निकटता स्यात् तया च प्रस्तुतस्य रसस्य उपकारः उपस्कारो वा भवति अतएव रसादिम् अनुगतः प्रकृष्टो वर्णविन्यास एवं अनुप्रासः कथ्यते उदाहरणं यथा-

**चन्द्रे शरन्निशोत्तंसे कुन्दस्तबकविभ्रमे।**
**इन्द्रनीलनिभं लक्ष्मसन्दधात्यनिलः श्रियम्।।५६।।**

अत्र चतुर्ष्वपि पादेषु चन्द्र चन्द्र-कुन्दसन्द-इत्यत्र नकार दकार-रकाराणां नकार-दकारयोर्वा रमणीया आवृत्तिरस्ति अत्र पादगतः अनुप्रासः। पदगतः अनुप्रासो यथा-

**चारु चन्द्रमसं भीरु विम्बं पश्यैतदम्बरे।।**
**मन्मनो मन्मथाक्रान्तं निर्दयं हन्तुमुद्यतम्।।५७**

अत्र चारु-चन्द्र-भीरु इति पदे चा-रुं वर्णयोः ''म्बं-म्ब'' इत्यत्र मकार बकारयोः संयुक्तयोः आवृत्तिः इति वृत्त्यनुप्रासः स च पदगतः। उभयत्र शृंगाररसपोषः।

<u>अत्रायं विशेषः</u>- प्रत्युदाहरणं यथा-

**इत्यनुप्रासमिच्छन्ति नातिदूरान्तरश्रुतिम्।**
**न तु रामामुखाम्भोज सदृशश्चन्द्रमा इति।।**

अत्र रामा पदगतस्य मा शब्दस्य श्रवणात् जातः संस्कारः चन्द्रमा इति पदघटकस्य मा शब्दस्य श्रवणपर्यन्तम् न अवतिष्ठते यतः दूरस्थोऽस्ति अतः ईदृशम् दूरान्तरश्रुतिम् अनुप्रासम् नेच्छन्ति अर्थात् अयम् अनुप्रासो नास्ति।

पुनश्च प्रत्युदाहरणम्-

**स्मरः खलः खलः कान्तः कायः कोपश्च न कृशः।**
**च्युतो मानोधिको रागो मोहो जातोऽसवो गताः।।५९।।**
**इत्यादि बन्धपारूष्यं शैथिल्यञ्च नियच्छति।।**
**अतो नैवमनुप्रासं दाक्षिणात्याः प्रयुञ्जते।।६०।।**

अत्र प्रथमपादे रेफखकारयोः, द्वितीये पादे ककाराणाञ्च आवृत्तिः अतः वृत्त्यनुप्रासः।

तृतीये-चतुर्थपादयोः दन्त्यवर्णानाम् प्रवेशात् श्रुत्यनुप्रासः प्रथमार्धे विसर्गाणां बहुलता अतः परूषता कठोरता। द्वितीयार्धे संयुक्तवर्णानाम् अभावः अतः शिथिलता अतः उभयोरेव अलंकारयोः अनुप्रासयोः क्रमश कठोरता शिथिलता च दोषः अतः इमौ न अलंकारौ। यथोक्तञ्च-

अनुस्वारविसर्गौ तु पारूष्याय निरन्तरौ।।

निष्कर्षतः दाक्षिणात्या ईदृशम् दोषयुक्तम् अलंकारं न स्वीकुर्वन्ति तथा गौडास्तु केवलम् अनुप्रासलोलुपा अतः सदोषमपि स्वीकुर्वन्ति।

यमक लक्षणम्-

**आवृत्तिं वर्णसंघात गोचरां कवयो विदुः।**

**तत्तुनैकान्त मधुरमतः पश्चाद् विधास्यते।।६१।।**

वर्णसंघातस्य आवृत्तिः यमकं भवति-तत् अतिमधुरं न भवति अतस्तस्य साङ्गोपाङ्गम् विवेचनम् माधुर्यगुणनिरूपणानन्तरं शब्दालंकार निरूपण प्रसंगे करिष्यते

दण्डिमतेन यमकापेक्षया अनुप्रासः अतिशयेन रसमाधुर्यपोषको भवति

यथा विजातीयैः पुष्पैः संकीर्णा पुष्पमाला अतिरमणीया भवति तदपेक्षया एकप्रकारकैः पुष्पैः ग्रथिता माला न्यून रमणीयतायुक्ता भवति अनुप्रासे यथा-

अपसारय घनसारं कुरू हारं
दूर एवं किंवलयैः।

यमके यथा-

नवपलाशपलाशवनं पुरः
स्फुट परा गपरागतपंकजम्।

अत्रायं विशेष-

कामं सर्वोऽप्यलंकारों रसमर्थे निषिञ्चतु।
तथाप्यग्राम्यतै वैनं भारं वहति भूयसा।।

यद्यपि अलंकाराणां रस पोषकत्वमस्ति
तथापि ग्राम्यता रहितेष्वेव स्थलेषु ते रसपोषकतां धारयन्ति।

भूयसा इति पदेन दण्डिना प्रकटीकृतं यत् क्वचित् ग्राम्यता अश्लीलता चापि न दोषस्वरूपा भवति- सुरतारम्भ ग्रोष्ठयादा वश्लीलत्वं गुणो भवेत्।

ग्राम्यतोदाहरणं यथा-

**कन्ये कामयमानं मां न त्वं कामयसे कथम्।**
**इति ग्राम्योऽयमर्थात्मा वैरस्याय प्रकल्पते।।**
**कामं कन्दर्प चाण्डालो मयि वामाक्षि निर्दयः।**
**त्वयि निर्मत्सरो दिष्टयेत्यग्राम्योऽर्थो रसावहः।।**

अत्र सर्वोऽपि अर्थः स्पष्टतया कथितः अतः सभ्यानां लज्जामुत्पादयति तेन रसास्वादे अपकर्षजनकः अतः सर्वथा अनादरणीयः

अग्राम्यता यथा द्वितीये श्लोके-

त्वां लक्ष्यीकृत्य कामदेवः मां निर्दयतया पीडयति इत्यत्रापि भावस्तु स एव परन्तु सहृदय हृदये लज्जा न जायते अतः एतादृशी अग्राम्यता रसपरिपोषिका भवति। इदमर्थगतं ग्राम्यत्वम् अग्राम्यत्वं च वर्तते।

शब्दगत ग्राम्यत्व निरूपणम्-

**शब्देऽपि ग्राम्यताऽस्त्येव सा सभ्येतर कीर्तनात्।**
**यथा यकारादि पदं रत्युत्सवनिरूपणे।।६५।।**
**पदसन्धानवृत्त्या वा वाक्यार्थत्वेन वा पुनः।**
**दुष्प्रतीतिकरं ग्राम्यं यथा या भवतः प्रिया।।६६।**

सभायाम् उच्चारणाय अयोग्यस्य असभ्यस्य शब्दस्य उच्चारणात् शब्देऽपि ग्राम्यतादोषः यथा रतिक्रीडाप्रसंगे यकारादि 'याभ' पदम्। यभ् मैथुने इति धातोर्निष्पन्नम् याभपदम् नितान्तरूपेण ग्राम्यम्।

पदानां परस्परसन्धौ कृतेऽपि ग्राम्यता दोषः समापतति यथा-

या भवतः प्रिया

या भवतः प्रिया इति विच्छेदपूर्वक पाठे

न ग्राम्यतया अश्लीलत्वम् परन्तु तस्यैव पदसन्धानेन 'याभवतः' इति पाठे तु- सततं मैथुनानुरक्तस्य भवतः प्रिया सततम् निरन्तरं वा सुरत प्रदानेन तर्पयति-

इत्यर्थेन असभ्यता प्रतीयते।

वाक्यार्थ रूपेण ग्राम्यत्वोदाहरणम्-

**खरं प्रहृत्य विश्रान्तः पुरुषो वीर्यवानिति।**
**एवमादि न शंसन्ति मार्गयोरूभयोरपि।।६७।।**

पराक्रमशाली दशरथपुत्रोरामः खरनामकं राक्षसं हत्वा विश्रमं प्राप्त-एषः

प्रकरणगतः अर्थः सर्वप्रथमं प्रतीयते-

पश्चात् तु-

वीर्यवान् क गाढ शुक्र कश्चिद् युवा कामुकः खरं गाढं मदनध्वजेन मदनमन्दिरम् ताडयित्वा ग्लानि प्राप्तवान् इति असभ्यः अर्थ, प्रतीयते-अतः न माधुर्यम्।

अत्रायं विशेषः-

**भगिनी भगवत्यादि सर्वत्रैवनुमन्यते।**
**विभक्तमिति माधुर्यमुच्यते सुकुमारता।।६८।।**

शिष्टपरिगृहीतानां भगिनी-भगवती-

शिवलिंग-विश्वयोनि प्रभृतीनां शब्दानां प्रयोगः

सर्वत्र व्यवहारे काव्येषु वैदर्भ्यादिषु रीतिषु च

निर्दोषतया स्वीक्रियते। यथोक्तञ्च भोजराजेन

संवीतस्य हि लोकेऽस्मिन् न दोषान्वेषणं क्षमम्।

शिवलिंगस्य संस्थाने कस्या सभ्यत्व भावना।।

सुकुमारतालक्षणम्-

**अनिष्ठुराक्षरप्रायं सुकुमारमिहेष्यते।**
**बन्धशैथिल्यदोषोऽपि दर्शित सर्वकोमले।।६६।।**

प्रायेण यत्र कोमलवर्णानां घटनम्

तादृशं वाक्यम् सुकुमारम्।

यदि सर्वाण्येव वाक्यानि कोमलानि एवं भवन्ति तदा बन्धे शिथिलतादोषोऽपि भवेत् अत एव कथयति दण्डी-

यथा मुक्तामाला या अन्तराऽन्तरा मध्ये मध्येवा रत्नानां गुम्फनं क्रियते तु किमपि चारूत्वमायाति तथैव कोमलाक्षराणां मध्ये मध ये कठोरक्षरनिवेशनेन रमणीयता आयाति उदाहरणं यथा-

**मण्डलीकृत्य बर्हाणि कण्ठैर्मधुरगीतिभिः।**
**कलापिनः प्रनृत्यन्ति कालेजीमूतमालिनि।।७०।।**

वर्षाकालिकं मयूर नृत्य वर्णन मिदम्-

अत्र कठोराणाम् अक्षराणां परित्यागात् सुकुमारता गुणः। चन्द्रालोकस्तु-

**सौकुमार्यमपारूष्यं पर्यायपरिवर्तनात्।**
**सकथाशेषतां यातः समालिंग्य मरुत्सखम्।।**

इति अत्र स मृतः इति न कथयित्वा कथाशेषतां गत इति कथनेन सुकुमारता आयाता अर्थे-तेन विदुषाम् नोद्वेग जननम्।

सुकुमारगुणस्य अवश्य स्वीकार्यत्वम्-

**इत्यनूर्णित एवार्थो नालंकारोऽस्ति तादृशः।**
**सुकुमारतयै वैत दारोहति सतां मनः।।७१।।**

केचन आचार्याः गुणमिमं श्रुति-

कटुत्वदोषस्य अभावस्वरूपं स्वीकुर्वन्ति। भरतमुनिर्गुणं मनुते परन्तु केचन प्राचीना अर्वाचीनाश्च आचार्या इमं गुणं न मन्यन्ते तेषां मतेन यावत् न अर्थचमत्कारः तावत् सुकुमारतया किं प्रयोजनम् अतः दोषाभाव मात्रम् परन्तु

दण्डिमतेन एतत् न समीचीनम्

यतः पूर्वश्लोके अर्थः अतितेजस्वी नास्ति तथा अलंकारोऽपि अतिस्फुटो नास्ति पुनरपि सज्जनानन्दकरम् तत्र च कारणम्

सौकुमार्य गुण एव यथोक्तञ्च-

तया कवितया किं वा किं वा वनितया तया।

पद विन्यासमात्रेण यया नापहृतं मनः।।

भोज राजोऽपि-

अलंकृतमपि श्रव्यं न काव्यं गुणवर्जितम्।

यदि भवति वचश्च्युतं गुणेभ्यो

वपुरिव यौवन वन्ध्य मगनायाः।।

अत्रायं विशेषः-

**दीप्तमित्यपरैर्भूम्ना कृच्छ्रोद्यमपि बध्यते।**

**न्यक्षेण क्षपितः पक्षः क्षत्रियाणां क्षणादिति।।७२।।**

गौडा सौकुमार्यगुणस्य अपेक्षां न कुर्वन्ति इति वर्ण्यतेऽत्र। अपरगौडसम्प्रदायस्य कविगणः दीप्तम् अर्थात् ओजोगुणयुक्तं मत्वा कष्टपूर्वकम् उच्चारणयोग्यम् काव्यमपि रचयन्ति

उदाहरणं यथा-

जन्मान्धः धृतराष्ट्रः क्षत्रियाणां समूहं स्वल्पेनैव कालेन क्षपयामास समापयायास वा स्वपुत्रः दुर्योधनादिः दुर्बुद्धया योजितः येन अन्ततः सर्व एवं नाशं प्राप्ताः

अत्र करूणरसः, न तु वीररसः यतः

धृतराष्ट्रस्तु युद्धरतो नासीत्-इति दशायाम्

अत्र कष्टेन उच्चारण योग्यः पदसमूहः

न प्रयोगयोग्यः परन्तु

गौडा केवलेन ओजोगुणलोभेन एतादृशं प्रयोगं कुर्वन्ति

अर्थव्यक्तिलक्षणम्-उदाहरणञ्च-

**अर्थव्यक्तिरनेयत्वमर्थस्य हरिणोद्धृता।**

**भूः क्षुरक्षुण्णनागासृग्लोहितादुदधेरिति।।७३।।**

यत्र अध्याहारादि कल्पनां विनैव अर्थः प्रतीयते तत्र अर्थव्यक्तिनामको गुणः यथा-

अत्र वराहावतारे सागरस्य जलं कथं रक्तवर्णम् जातम् इत्यस्य यदि कारणं कथितं न भवेतु नेयार्थत्वं स्यात् यथा प्रत्युदाहरणे-

**मही महावराहेण लोहिता दुद्घृतोदधेः।**

**इतीयत्येव निर्दिष्टे नेयत्वमुरगासृजः।।७४।।**

इति अत्र-सागरस्य रक्तवर्णत्वस्य कारणं न कथितम् अत्र नोयार्थत्वम्

परन्तु पूर्वोदाहरणे तु सागरजलस्य रञ्जने कारणीभूतः नागासृक्सम्पर्कः उक्तः अतः नोयार्थत्वस्य अभावात् अर्थस्य स्पष्टं व्यक्तिः अतः अर्थव्यक्तिः।

अत्रायं विशेषः-

**नेदृशं बहुमन्यन्ते मार्गयोरुभयोरपि।**

**नहि प्रतीतिः सुभगा शब्दन्यायविलंघिनी।।७५।।**

वृत्त्युपस्थितानाम् अर्थात् शाब्दबोध पद्धतिरूपः शब्दन्यायः इत्यस्य यत्र उल्लंघनं भवति स बोधो न समीचीनः अतः गौड-वैदर्भ मार्गयोः आचार्या अस्य आदरं न कुर्वन्ति।

उदारता लक्षणम्-

**उत्कर्षवान् गुणः कश्चिद् यस्मिन्नुक्ते प्रतीयते।**

**तदुदारा ह्ययं तेनसनाथा काव्यपद्धतिः ।।७६।।**

यस्मिन् वाक्ये युक्ते सति कश्चित् उत्कर्षवान् वर्णनीयवस्तु महत्ता सूचकः अर्थः धर्मविशेषो वा प्रतीयते स उदारतागुणः तेन काव्यरीतिः चमत्कारयुक्ता भवति।

दृष्टान्तप्रदर्शनं यथा-

**अर्थिनां कृपणा दृष्टि स्त्वन्मुखे पतिता सकृत्।**
**तदवस्था पुनर्देव नान्यस्य मुखमीक्षते।।**
**इति त्यागस्य वाक्येऽस्मिन्नुत्कर्षः साधु लक्ष्यते।**
**अनेनैव पथान्यच्च समानन्यायमूह्यताम्।।**

त्वयैव पूरितो येषाम् अभिलाषः ते दीना याचका अन्यस्य दातुः समीपे न गच्छन्ति इति वाक्ये दानस्य उत्कर्षः प्रतीयते अतः उदारतागुणः। एवमेव अन्यत्रापि उत्कर्षस्य प्रतिपादनम् भवति तत्रापि उदारतागुणः।

परकीयम् उदारतालक्षणोदाहरणम्-

श्लाध्यै र्विशेषणैर्युक्तमुदारं कैश्चिदिष्यते।

उत्तानपदता औदार्यम् युतं श्लाध्यैर्विशेषणैः इति अग्निपुराणीयम् उदारतालक्षणम् अर्थात् यत्र प्रशंसनीयैः विशैषणैः वस्तूनाम् उत्कर्षः वर्ण्यते स उदारता गुणः उदाहरणं यथा-

**यथा लीलाम्बुज क्रीडा सरो हेमांगदादयः ।।७६।।**

अत्र लीलाम्बुज पदे लीलेति विशेषणेन आकार-वर्ण-सुगन्धातिशयः प्रतीयते। क्रीडासरः पदे क्रीडा विशेषणेन प्रतीयते यत् कमल-सारस-विहारनौका सनाथता वर्तते, न जलमात्रम्।

हेमांगदपदे हेम पदेन प्रतीयते यत् रत्नखचितता वर्तते। एवमेव मणिनुपुर रत्नकाञ्ची कनक कुण्डलादीनि पदान्यपि उत्कर्षगर्भाणि।।

ओजोगुण लक्षणम्-

**ओजः समासभूयस्त्वमेतद् गद्यस्य जीवितम्।**
**पद्येऽप्यदाक्षिणात्यानामिदमेकं परायणम्।।८०।।**

समसनं संक्षेपणं समासः अर्थात् द्वयोः बहूनांवा पदानाम् एकपदत्व प्राप्तिः समासः। यत्र समास बहुलता स ओजोगुणः। एतदेव गद्यस्य प्राणस्वरूपं भवति। अस्य गुणस्य विषये गौड-वैदर्भयोः सहमतिरस्ति परन्तु गौडा गद्ये पद्ये च समानभावेन ओजोगुणं स्वीकुर्वन्ति परन्तु वैदर्भाः गद्यमेव ओजोगुणेन भूषण योग्यम् जीवन योग्यञ्च मन्यन्ते इत्येव विशेषः।

ओजोगुणस्य नाना प्रकारता-

**तद्गुरूणां लघूनाञ्च बाहुल्याल्पत्व मिश्रणैः।**
**उच्चावच प्रकारन्तत् दृश्यमाख्यायिकादिषु।।८१।।**

दीर्घवर्णार्नां ह्रस्ववर्णानाम् च बहुलतया न्यूनतया मिश्रणतया च द्विविधम् ओजः इत्थम् नानाविध ओजोगुणः गद्यप्रबन्धेषु प्रायेण लभ्यते अनुभूयते

गौडानां प्रिय ओजोगुणो यथा-

**अस्तमस्तकपर्यस्त समस्तार्कांशुसंस्तराः।**
**पीनस्तनस्थिताताम्र कम्रवस्त्रेव वारुणी।।८२।।**

इति पद्येऽपि पौरस्त्या वध्नन्त्योजस्विनी र्गिरः।

सूर्यस्य समस्तेन किरणजालेन आच्छादितस्य अस्ताचलस्य उपरि विकीर्णया शोभया युक्ता पश्चिमदिशा नायिकेव प्रतीयमाना आसीत् यया रक्तवस्त्रेण स्वकीयम् उन्नतं स्तनद्वयम् आच्छादितमासीत्।

एवम् गौडाः पद्येऽपि ओजोगुणं मन्यन्ते। वैदर्भाणां प्रिय ओजोगुणो यथा-

**अन्ये त्वनाकुलं हृधमिच्छन्त्योजो गिरां यथा।।८३।।**
**पयोधरतटोत्सङ्ग लग्न सन्ध्यातपांशुका।**
**कस्य कामातुरं चेतो वारुणी न करिष्यति।।८४।।**

वैदर्भा वाण्याम् ओजोगुणं तदैव
स्वीकुर्वन्ति यदा सा स्पष्टेन अर्थेन युक्ता
हृदयहारिणी च भवेत्। यथा-
सन्ध्याकालिकेन सूर्यकिरणजालेन मेधानां तटा
यथा आच्छादिता भवन्ति तथैव पश्चिमदिशा-
रूपाया बालाया स्तनोपरिभागा आच्छादिताः
सन्ति सा सर्वस्यैव चित्तम् कामातुरं करोति

अत्र यद्यपि ओजोगुणाय अपेक्षितः समासो वर्तते परन्तु पूर्वोदाहरणवत् क्लिष्टपदत्वं नास्ति इति वैदर्भा अभिमानं कुर्वन्तः सहर्षं स्वीकुर्वन्ति।

कान्ति गुणलक्षणम्-

**कान्तं सर्वजगत् कान्तं लौकिकार्थानति क्रमात्।**
**तच्च वार्ताभिधानेषु वर्णनास्वपि दृश्यते।।८५।।**

लोकप्रसिद्धस्य अर्थस्य वस्तुनो वा परित्यागः न क्रियते तेन आपामरं प्रसिद्धस्य अर्थस्य निबन्धनं क्रियते अत एव सर्वजनप्रियः कान्तिनामको गुणः

अयं कान्तिनामकः अर्थगुणः आचार्यदण्डिनः मतेन अर्थगुणः अस्ति- अर्थानुसन्धात् पूर्वम् अस्य गुणस्य उदयो न भवति। कान्तिगुणोपेतस्य वाक्यस्य प्रयोगः लौकिकेषु उपचारवचनेषु तथा प्रशंसापरकेषु वाक्येष्वपि भवति।

वार्ताभिधानरूपा कान्तिर्यथा-

**गृहाणि नाम तान्येव तपोराशिर्भवादृशः।**
**सम्भावयति यान्येव पावनैः पादपांसुभिः।।८६।।**

अत्र सत्पुरूषाणां चरणकमलसम्पर्केण गृहाणां प्रशस्ततावर्णनं लोकप्रसिद्धम् अतः वार्ताभिधानरूपा कान्तिः।

वर्णनारूपा कान्तिर्यथा-

**अनयोरनवद्यांगि स्तनयोर्जृम्भमाणयोः।**
**अवकाशो न पर्याप्तस्तव बाहुलतान्तरे।।८७।।**

तव वक्षसि विशालस्तनयोः अवस्थानयोग्यम् स्थानं नास्ति तेन स्तनयोः स्तन द्वयस्य उन्नतता विशालता च अभिव्यक्ता भवति अतः वर्णनायां कान्तिगुणः।

अत्रायं विशेषः-

**इति सम्भाव्य मेवैतद् विशेषाख्यान संस्कृतम्।**
**कान्तं भवति सर्वस्य लोकयात्रानुवर्तिनः।।८८।।**

वार्तावर्णनयोः करणीययोः केवलं समान्यपदप्रयोगेण कथने सति न कान्तिगुण, अपितु विशिष्ट वर्णनात्मक प्रकारेणैव कान्तिगुणः इति दण्डि हृदयम्। एष मार्गः वैदर्भजनप्रियः।

गौडजन प्रियो यथा-

**लोकातीत इवात्यर्थमध्यारोप्य विवक्षितः।**
**योऽर्थस्तेनाति तुष्यन्ति विदग्धा नेतरे जनाः।।८९।।**
**देवधिष्ण्यमिवाराध्य मद्यप्रभृति नो गृहम्।**
**युष्पत्पादरजः पात धौत निःशेष किल्विषम्।।९०।।**
**अल्पं निर्मितमाकाश मनालोच्यैव वेधसा।**
**इदमेवं विधं भावि भवत्याः स्तनजृम्मणम्।।९१।।**
**इदमत्युक्तिरित्युक्त मेतद् गौडो पलालितम्।**
**प्रस्थानं प्राक् प्रणीतन्तु सारमन्यस्य वर्त्मनः।।९२।।**

यत्र गुणगण प्रक्रमे वार्ता प्रशंसयोः उदाहरण द्वयम् यथा देवमन्दिरम् लोका बहु आद्रियन्ते तथैव भवतां चरणकमलधूलिपतनेन यस्य पापनिवृत्तिः संजाता इदं मम गृहम् लोका बहुमानेन संभावयन्ति सम्भावयिष्यन्ति वा-

अत्र कविकल्पितेन वस्तुना लोकप्रसिद्धेः अतिक्रमणं भवति। लोके हि सत्पुरूषचरणरजः सम्पर्केण गृहस्य पवित्रता एव प्रसिद्धा, न तु देवमन्दिरवत् आराध्यता, सा तु कविकल्पिता।

यदि ब्रह्मा भवदीययोः स्तनयोः विस्तारम् पूर्वम् अचिन्तयिष्यत् तदा एतादृशम् अल्पं व्योम निर्माय कृतित्वं न आकलयिष्यत्

इदं वर्णनम् अतिशयोक्तिपूर्णम् गौडजनप्रियम्-न वैदर्भवल्लभम्।

समाधि गुणलक्षणम्-

**अन्य धर्मस्ततोऽन्यत्र लोकसीमानुरोधिना।**
**सम्यगाधीयते तत्र स समाधिः स्मृतो यथा।।९३।।**

कान्तदर्शी कविः लोकमर्यादायाः पालने जागरूको भवति स यदि अप्रस्तुतम् अर्थ गुणं वा प्रस्तुते वर्णयति तत्र सम्यक् आधानात् समाधिगुणः उदाहरणं यथा

**कुमुदानि निमीलन्ति कमलान्युन्मिषन्ति च।**
**इति नेत्र क्रियाध्यासाल्लब्धा तद्वाचिनी श्रुतिः।।९४।।**

निमीलनोन्मीलने नयनधर्मौ, कुमुदानां संकोचः कमलानां विकासश्च प्रतिपाद्यौ प्रस्तुतौ। निमीलनोन्मीलनशब्दौ उच्चार्यमाणौ सादृश्यातिशयमहिम्ना संकोच विकासयोः उपचर्येते। तयोः एकेन शब्देन प्रतिपाद्यत्वं वर्णनीयत्वं वा सादृश्यमूलकम् तद्वाचिनी श्रुति अर्थात् तामेव क्रियाम् प्रकटयितुम् तयोरेव शब्दयोः प्रयोगः। अर्थात्

समाधिगुणे साध्यवासानलक्षणया

अन्यदीप धर्मस्य आरोपो भवति।

गौण वृत्त्या शोभातिशयजननं यथा-

**निष्ट्यूतोद्‌गीर्णवान्तादि गौणवृत्तिव्यपाश्रयम्।**
**अतिसुन्दरमन्यत्र ग्राम्यकक्षां विगाहते।।९५।।**
**पद्मन्यर्कांशुनिष्ठयूताः पीत्वा पावकविप्रुषः।**
**भूयो वमन्तीव मुखैरूद्‌गीर्णारुणरेणुभिः।।९६।।**

इति हृद्यम्, अहृद्यम् तु निष्ठीवति वधूरिति।

अत्र निष्ठयूतपदं बहिः क्षिप्ते, पानपदं ग्रहणे, वमतिक्रिया बहिः क्षेपे, उद्‌गीर्ण पदं निर्गमे-इति लाक्षणिकानि पदानि-

एतत् सहृदय मनोहरम्।

ग्राम्यत्वात् अनुचितन्तु यथा-वधूः निष्ठीवति

इति असुन्दरम्-

सुन्दरता यथा सुबन्धौ-

अविदितगुणाऽपि सत्कविभणितिः
कर्णेषु वमति मधुधाराम्।।

लाक्षणिक प्रयोग एव रमणीय, न तु मुख्यवृत्तिप्रयोगः वमतिप्रभृति शब्दानाम्-

किमेकधर्मारोप एव समाधिः उत अनेकधर्मारोपः

**युगपन्नैकधर्माणामध्यासश्च कृतो यथा।।९७।।**
**गुरुगर्भभरक्लान्ताः स्तनन्त्यो मेघपंक्तयः।**
**अचलाधित्य कोत्संगमिमाः समधिशेरते।।९८।।**
**उत्संगशयनं सख्याः स्तननं गौरवं क्लमः।**
**इतीमे गर्भिणी धर्माः बहवोऽप्यत्र दर्शिताः।।९९।**

अत्र सखीक्रोडे श्यनम् स्तननम् शब्दकरणम् मन्दता गौरवम् इत्यादयः गर्भवती धर्माः मेघमालायाम् आरोपिताः तेन अनेक धर्माणाम् युगपत् एकस्मिन् काले सहैव आरोपोऽपि समाधिनामको गुणः।

अत्रायं विशेष-

**तदेतत् काव्यसर्वस्वं समाधिर्नाम यो गुणः।**
**कविसार्थः समग्रोऽपि तमेनमनुगच्छति।।१००।**

गौडवैदर्भ सम्प्रदाय विभक्तः समस्तोऽपि कविगणः सभाधिगुणस्य आदरं करोति अतः एतत् काव्यसर्वस्वम्

मार्गनिरूपणस्य उपसंहारः-

**इति मार्गद्वयं भिन्नं तत्स्वरूप निरूपणात्।**
**तद्भेदास्तु न शक्यन्ते वक्तुं प्रतिकविस्थिताः।।१०१।।**
**इक्षुक्षीरगुडादीनां माधुर्यस्यान्तरं महत्।**
**तथापि न तदाख्यातुं सरस्वत्यापि शक्यते।।१०२।।**
**इति वैदर्भमार्गस्य प्राणाः दश गुणाः कृताः।**
**एषां विपर्यय प्रायो दृश्यते गौडवर्त्मनि।।**

इत्यनुसारेण गौडवैदर्भनामक प्रस्थानद्वयम् अतिभिन्नम् तयो आवन्तिकीलाटी मागधीप्रभृतयः अवान्तर प्रकाशः कथमपि वक्तुं शक्यते।

दृष्टान्त प्रदर्शनं यथा-

इक्षु, क्षीरम् पयः, गुड इक्षुविकार-एषाम् मधुरतायाः परस्पर तारतम्यम् महत् अस्ति केनापि कथयितुं न शक्यते तथैव वाग्देवतया सरस्वत्यापि गौड वैदर्भमार्गयो अवान्तरभेद भेदवचनं कर्तुं न शक्यते-तदा सामान्येन कविगणेन जनेन किमु इत्यलम्-

काव्यकारणनिरूपणम्-

**नैसर्गिकी च प्रतिभा श्रुतञ्च बहुनिर्मलम्।**
**अमन्दश्चाभियोगोऽस्याः कारणं काव्यसम्पदः।।**

नैसर्गिकी स्वभाव सिद्धा पूर्वजन्मसंस्कारेण प्राप्ता नव नवोन्मेषशालिनी कवित्व बीजरूपा प्रतिभा प्रज्ञा-

संशंयादि मलसम्पर्करहितम् नानाशास्त्र परिशीलनं श्रुतम् शास्त्राभ्यसनम् तथा अमन्दो महान् अभियोगः अर्थात् काव्यं कर्तुं विचारयितु ये विदन्ति जानन्ति तेषाम् शिक्षया पुनः पुनः काव्यकारणप्रवृत्ति इत्येतत् त्रयं व्यासक्ततया दण्डक्रादिन्यायेन समुदितम् कारणम् भवति तावत् काव्यरूपाया सम्पत्तेः।

तृणारणिमणि न्यायेन न प्रत्येकपर्याप्तम् कारणत्वम् यथोक्तञ्च जयदेवेन-

**प्रतिभैव श्रुताभ्याससहिता कवितां प्रति।**
**हेतुर्मृदम्बुसम्बद्धा बीजमाला लतामिव।।**

यथा केवलं बीजं मृत्तिकां विना जलसहितमपि, तथा मृत्तिकासहितमपि जलं विना लतायाः कारणं भवितुं न शक्नोति

तथैव केवलेन श्रुतेन अभ्यासेन वा सहिता प्रतिभा न काव्यकारणम् अपितु श्रुताभ्यास सहिता एव प्रतिभा काव्यकारणम्

अत्रायं विशेषः-

सरस्वत्यनुग्रहेणापि कवितासाफल्यम्-

**न विद्यते यद्यपि पूर्ववासना गुणानुबन्धिप्रतिभानमद्भुतम्।**
**श्रुतेन यत्नेन च वागुपासिता ध्रुवं करोत्येव कमप्यनुग्रहम्।।१०४।।**

पूर्वजन्म संस्कारवशात् या प्रतिभा भवति सा सर्वस्य सुलभा न भवति पुनरपि यः कोऽपि शास्त्राणाम् अध्ययनम् तथा काव्यकरणे पुनः पुनः प्रवृत्तिरूपम् अभ्यासं करोति तु सरस्वती अवश्यमेव कवितानिर्माणे अनुग्रहं करोति यथोक्तञ्चापि-

**सरस्वती स्वादु तदर्थवस्तु-**
**निष्यन्दमाना महतां कवीनाम्।**
**अलोकसामान्यमभिव्यनक्ति**
**परिस्फुरन्तं प्रतिभाविशेषम्।।**

अतः सरस्वती सततं सेवनीयेति समुपदिशति दण्डी-

**तदस्तन्द्रैरनिशं सरस्वती**
**श्रमादुपास्या खलु कीर्तिमीप्सुभिः।**
**कृशे कवित्वेऽपि जनाः कृतश्रमाः**
**विदग्धगोष्ठीषु विहर्तुमीशते।।१०५।।**

प्रतिभाया अभावेऽपि यदि लोकः आलस्यरहितः सन् काव्यकर्मणि तत्परो भवति तदा काव्य निर्माणस्य चतुरतायाम् न विद्यमानायामपि काव्यार्थज्ञताम् प्राप्तनोति ततः सरसजन समाजे दक्षताम् प्राप्नोति। सरस्वत्या उपासना कदापि व्यर्था न भवति अतः-

सदा सेव्या सदा सेव्या सदा सेव्या सरस्वती इत्यलम्-

इति दण्डिविरचित प्रथमः परिच्छेदः-

# द्वितीयः परिच्छेदः

कविताया अलंकारास्ते भवन्ति ये कविताकामिन्या वाचक-वाच्यरूपम् शब्दार्थमयम् शरीरम् आलंकुर्वन्ति भूषयन्ति, किं बहुना सौन्दर्यवृद्धि कुर्वन्ति यथा कटक कुण्डलादयोऽपि कस्याश्चन सुन्दर्याः एव कण्ठादिषु अंगेषु सौन्दर्यवृद्धिं कुर्वन्ति।

अत्रेदमवधेयमस्ति यत् कविताया रसरूपम् आत्मतत्त्वम् सुन्दरं भवेत् तदैव सौन्दर्यवृद्धिः सम्भवेत् यथा काऽपि नायिका स्वभावेन सुन्दरी भवेत् तदैव हारादिकम् तस्या कण्ठादिकम् भूषयति अन्यथा

कुरूपायाः नायिकाया हारादीनि भूषणानि दृष्टि वैचित्र्यमात्रजनकानि तथैव नीरसाया कविताया अपि अनुप्रासादयः अलंकाराः पाठकानां कृते दृष्टिविचित्रतामात्रमेव जनयन्ति, न श्रीवृद्धिं कर्तुं शक्नुवन्ति-

अतः आचार्यदण्डी उत्कर्षहेतुभूतानाम् अलंकाराणां सामान्य स्वरूपम् प्रस्तौति-

अलंकार सामान्य लक्षणम्-

**काव्यशोभाकरान् धर्मानलंकारान् प्रचक्षते।**
**ते चाद्यापि विकल्प्यन्ते कस्तान् कात्स्न्येंन वक्ष्यति।।१।।**

इष्टार्थव्यवच्छिन्नपदावलिः काव्यम् इति काव्यस्य स्वरूपम् तस्य शोभायाः रमणीयतायाः
सम्पादकाः ये अर्थाः अनुप्रासोपमादयः त एव
अलंकाराः कथ्यन्ते प्राचीनैः आचार्यैः।
अलंकाराः बहुविधा भवन्ति-तेषाम् सर्वात्मना निरूपणं न सम्भवति अतः सविनयम् ग्रन्थकारः कथयति यत्-
महात्मभिः क्रान्तदर्शिभिः कविभिरपि
सहस्रशः अलंकारा प्रकाशिताः प्रकाश्यन्ते
चापि अतः कोऽपि तान् सम्पूर्णतया निरूपयितुम्
न शक्नोति निष्कर्षतः मेघाविनां न कदापि
भवति कल्पना विरामः अतः अलंकारा अपि
इयन्त एवेति कथं कथयितुं शक्यते।
पुनरपि कथं दण्डिनः प्रवृत्तिरिति जिज्ञासायाम्-

**किन्तु बीजं विकल्पानां पूर्वाचार्यैः प्रदर्शितम्।**
**तदेव प्रति संस्कर्तुमयमस्मत् परिश्रमः।।२।।**

यथा नवीनैरूद्भावितानाम् उपमा भेदानाम्
बीजं भरतमुनिना समुपन्यस्तं यथा-
''उपमा नाम सा ज्ञेया गुणाकृति समाश्रया''।

एतदेव बीजम् आधारीकृत अन्यै आचार्यै उपमा भेदाः प्रकल्पिता तदेव तादृशम् बीजजातम् अन्विष्य अहम् प्रतिसंस्कर्तुम् उद्यतोऽस्मि यथोक्तञ्चापि-

**तं पूर्वाचार्य सूर्योक्ति ज्योतिः स्तोमोद्गमं स्तुमः।**
**यं प्रस्तूय प्रकाशन्ते मद्गुणास्त्रसरेणवः।।**
**नाशङ्कनीयमेतेषां मतमेतेन दूष्यते।**
**किन्तु चक्षुर्मृगाक्षीणां कज्जलेनेव भूष्यते।।**
**काश्चिन्मार्गविभागार्थमुक्ताः प्रागप्यलक्रियाः।**
**साधारणमलंकार जातमन्यत् प्रकाश्यते।।३।।**

प्रथमे परिच्छेदेऽपि गौड बैदर्भ भेदेन केचन अलंकाराः निरूपिताः परन्तु अत्र दण्डि सम्मतः अलंकार समुदायः सलक्षणोदाहरणं विशदीक्रियते अलंकाराणां नामग्राहं गण नं यथा-

**स्वभावाख्यानमुपमा रूपकं दीपकावृती।**
**आक्षेपोऽर्थान्तरन्यासो व्यतिरेकोविभावना।।४।।**
**समासातिशयोत्प्रेक्षा हेतुः सूक्ष्मो लवक्रमः।**
**प्रेयो रसवदूर्जस्विपर्यायोक्तं समाहितम्।।५।।**
**उदात्तापहनुतिश्लेष विशेषा स्तुल्ययोगिताः।**
**विरोधाप्रस्तुतस्तोत्रे व्याजस्तुतिनिदर्शने।।६।।**
**सहोक्तिपरिवृत्त्याशीः संकीर्णमथ भाविकम्**
**इति वाचामलंकाराः दर्शिताः पूर्वसूरिभिः ।।७।।**

एते प्राचीनाचार्यसम्मताः पञ्चत्रिंशत् अलंकारा अर्थगताः तथाऽपि एते
वाचाम् अर्थात् शब्दानाम् अलंकाराः
शब्दालंकाराः कथिताः यतः शब्दार्थयोः
तादात्म्यम् वैयाकरण सिद्धान्त सम्मतम्
स्वभावोक्तिलक्षणम्-

**नानावस्थं पदार्थानां रूपं साक्षाद् विवृण्वती।**
**स्वभावोक्तिश्च जातिश्चेत्याद्या सालंकृतिर्यथा।।८।।**

तत्तद्देशभेदेन स्थितानाम् स्थावर-
जगमात्मकानां वस्तूनाम् जाति-गुण-क्रिया-द्रव्यवशेन विविध प्रकारकं रूपम् वर्ण्यते-वस्तुनः यथावत् स्वरूप स्फुटीकरणे समर्थम् असाधारण धर्मवर्णनम् स्वभावोक्तिः
अलंकार सामान्येऽपि अपेक्षितम् चमत्कार कत्वं तु परमावश्यकम् अतएव-
दीर्घपुच्छश्चतुष्पादः ककुद्माँल्लम्बकम्बलः।
गोरपत्यं बलीवर्दस्तृणमत्ति मुखेन सः।
अत्र अलंकारजीवातुभूतश्चमत्कारो
नास्ति अतः अयम् अलंकारो नास्ति।।
जातिस्वभावोक्तिर्यथा-

**तुण्डैराताम्रकुटिलैः पक्षैर्हरितकोमलैः।**
**त्रिवर्णराजिभिः कण्ठे रेते मञ्जुगिरः शुकाः।।६।।**

अत्र तुण्डादीनाम् ताम्रत्वादिकः धर्मः सर्वस्या एव शुकजातेः अस्ति अतः अत्र-जातिस्व भावोक्तिः।
कियास्वभावोक्तिर्यथा-

**कलक्वणितगर्भेण कण्ठेनाघूर्णितेक्षणः।**
**पारावतः परिभ्रम्य रिरंसुश्चुम्बति प्रियाम्।।१०।।**

अत्र कलक्वणितादयः सर्वे धर्माः पारावतस्य अर्थात् कपोतस्य चुम्बन क्रियाया एवं सन्ति अत क्रियागता स्वभावोक्तिः।
गुण स्वभावोक्तिर्यथा-

**बध्नन्नङ्गेषु रोमाञ्चं कुर्वन् मनसि निर्वृतिम्।**
**नेत्रे चामीलयन्नेषः प्रियास्पर्थः प्रवर्तते।।११।।**

अत्र प्रियास्पर्शरूपस्य गुणस्य नानावस्थामयं वर्णनम् अतः अत्र गुणगता स्वभावोक्तिः।
द्रव्य स्वभावोक्तिर्यथा-

**कण्ठेकालः करस्थेल कपालेनेन्दुशेखरः।**
**जटाभिः स्निग्धताम्राभिराविरासीद्वृषध्वजः।।१२।।**

अत्र कण्ठे कालत्वादय सर्वेऽपि धर्माः

शिवरूपम् एकं द्रव्यं गता अतोऽत्र द्रव्यस्वभावोक्तिः।

अत्रायं विशेष-

**जातिक्रियागुणद्रव्यस्वभावाख्यानमीदृशम्।**
**शास्त्रेष्वस्यैव साम्राज्यं काव्येष्वप्येतदीदृशम्।।१३।।**

शास्त्रेष्वपि स्वभावोक्तेः साम्राज्यम् यतः तत्र वस्तुस्वरूप वर्णनं परमाश्यकं भवति तेनैव तत्त्वस्य निर्णयः। काव्ये तु अभीष्ट मेव स्वभावाख्यानम्।

उपमा लक्षणम्-

**यथा कथञ्चित् सादृश्यं यत्रोद्भूतं प्रतीयते।**
**उपमा नाम सा तस्याः प्रपञ्चोऽयं प्रदर्श्यते।।१४।।**

यत्र काव्ये येन केनापि गुणक्रियादिरूपेण स्फुटं सादृश्यम् अर्थात् उपमानोपमेययोः साम्यम् अभिधादिवृत्त्या प्रतीयते सा उपमा।

काव्यनिष्ठम् चमत्कारजनकं द्वयोः सादृश्यम् उपमा। चमत्कारविरहे न उपमा यथा-गौरिव गवयः

उपमाया श्चत्वारि अंगानि-

उपमेयम् मुखादिकम् उपमानम् चन्द्रादिकम् साधारण धर्मः सुन्दरत्वादिको वाचकशब्दश्च इवादिकः। एषां संपूर्णानां प्रयोगे पूर्णोपमा लोपे च एकस्य द्वयोस्त्रयाणां वा लुप्तोपमा।

उपमाप्रपञ्चः सलक्षणोदाहरणो यथा-

१. धर्मोपमा

**अम्भोरुहमिवाताम्रं मुग्धे करतलं तव।**
**इति धर्मोपमा साक्षातुल्य धर्मप्रदर्शनात्।।१५।।**

अत्र करतलम् उपमेयम् अम्भोरूहम् उपमानम् अनयो आताम्रत्वरूपः तुल्यधर्मः प्रदर्शितः अतः धर्मोपमा। उपमानोपमेय साधारणधर्म वाचकानां प्रयोगात् पूर्णोपमा।

इव शब्द श्रवणात् श्रौत्युपमा।

२. वस्तूपमा-

**राजीवमिव ते वक्त्रं नेत्रे नीलोत्पले इव।**
**इयं प्रतीयमानैक धर्मा वस्तूपमैव सा।।१६।।**

अत्र वक्त्र-राजीवयोः नेत्र-नीलोत्पलयोः सादृश्यं वर्णितम् परन्तु साधारणधर्मः सुन्दरत्वादिकः शब्देन न कथ्यमानः अतः प्रतीयमानः तेन वस्तूपमा अर्वाचीन मते च धर्मलुप्तोपमा।

३. विपर्यासोपमा

**त्वदाननमिवोन्निद्रमरविन्द म भूदिति।**
**सा प्रसिद्धि विपर्यासा द्विपर्यासोपमेष्यते।।१७।।**

यत्र काव्ये उपमेयस्य उत्कर्षस्य प्रतिपादनाय उपमेयोपमान भावे विपर्ययः विपरीतता वर्ण्यते अर्थात् कमल मुपमानं मुखञ्च उपमेयम् इति प्रसिद्धि स्तस्या विपर्यासात् अत्र विपर्यासोपमालंकारः। नवीनमतेन प्रतीपालंकारः।

४. अन्योन्योपमा-

**तवाननमिवाम्भोजमम्भोजमिव ते मुखम्।**
**इत्यन्योन्योपमा सेयमन्योन्योत्कर्ष शालिनी।।१८।।**

यत्र तृतीय सदृशस्य व्यपच्छेदाय उपमानोपयेययोः परस्पर सादृश्यं वर्ण्यते आ आन्योन्योपमा यथा अत्र मुखकमलयो परस्पर समानता। अर्वाचीना उपमेयापमां मन्यन्ते।

५. नियमोपमा-

**त्वन्मुखं कमलेनैव तुल्यं नान्येन केनचित्।**
**इत्यन्य साम्यव्यावृत्तेरियं सा नियमोपमा।।१६।।**

अत्र नायिका मुखस्य कमलेन एव समानता वर्णिता-अन्येषां चन्द्रादीनाम् साम्यं निषिद्धम् एकस्य वस्तुन बहूपमान विहीनता अतः एकत्रैव नियमनात् नियमोपमा।

६. अनियमोपमा-

**पद्मं तावत्तवान्वेति मुखमन्यच्च तादृशम्।**
**अस्ति चेदस्तु तत्कारीत्यसाव नियमोपमा।।२०।।**

कमलं नायिका मुखम् अनुकरोति तथा चन्द्रतिरिक्तम् चन्द्रादि तव मुख मनुकरोति तु अनुकरणं कुर्यात्-उपमान विषये नियमस्य अभावः अतः अनियमोपमा।

७. समुच्चयोपमा-

**समुच्चयोपमाऽप्यस्ति न कान्त्यैव मुखं तव।**
**ह्लादनाख्येन चान्वेति कर्मणेन्दुमितीदृशी।।२१।।**

अत्र मुख चन्द्रयोः सादृश्यम् अतः उपमा तथा कान्तिगुणस्य आह्लादनामकस्य गुणस्य च समुच्चयः अत समुच्चयोपमा।

८. अतिशयोपमा-

**त्वय्येव तवन्मुखं दृष्टं दृश्यते दिवि चन्द्रमाः।**
**इयत्येव भिदा नान्येत्यसावति शयोपमा।।२२।।**

अत्र उपमानोपमेययो चन्द्र-मुखयोः महान् भेदः परन्तु मुखं नायिकाशरीरे

तथा चन्द्र आकाशे वर्तते-इत्येव किञ्चिद्भेदः नान्यः कोऽपि भेदः इति अतिशयोक्ति-पूर्णम् सादृश्यम् अथवा अभिन्नताध्यवसानेन उपमेयस्य गुणक्रियातिशयः अतः अतिशयोपमा।

९. उत्प्रेक्षितोपमा-

**मध्येवास्या मुखश्रीरित्यलमिन्दोर्विकर्त्थनैः।**
**पद्मेऽपि सा सदस्त्येवेत्यसावुत्प्रेक्षितोपमा।।२३।।**

अस्या नायिकायाः मुखशोभा मयि चन्द्र एव अतः अहं सौभाग्यशाली इति चन्द्रस्य आत्मप्रशंसा व्यर्था यतः सा तु चन्द्रेऽपि वर्तत एव। चन्द्रस्तु विकत्थनं तथा न करोति-नायक एवं चाटुवचनाय तथा उत्प्रेक्षते संभावनां करोति अतः उत्प्रेक्षितोपमा

१०. अद्भुतोपमा-

**यदि किञ्चिद् भवेत् पद्मं सुभ्रु विभ्रान्तलोचनम्।**
**तत्ते मुखश्रियं धत्तामित्यसावद् भुतोपमा।।२४।।**

यदि कमले नेत्र संयोगः घटेत तदा तत् कमलम् तव मुख शोभां प्राप्तुं समर्थम् भवेत् इतीयम् अद्भुतोपमा न भूतो न भविष्यति नेत्र संयोगः कमले।

११. मोहोपमा-

**शशीत्युत्प्रेक्ष्य तन्वङ्गि त्वन्मुखं त्वन्मुखाशया।**
**इन्दुमप्यनुधावमीत्येषा मोहोपमा स्मृता।।२५।।**
**प्रतियोगिनमारोप्य तदभेदेन कीर्तनम्।**
**उपमेयस्य यन्मोहोपमासौ परिकीर्तिता।।**

इति अग्निपुराणवचनानुसारेण मोहो भ्रान्तिः सादृश्येन इन्दौ मुखभ्रमः

अत एव नायकस्य चन्द्रमनुधावनम् अतः अत्र मोहमूलकतया मुखचन्द्रयोः सादृश्यम् तेन मोहोपमा।

१२. संशयोपमा-

**किं पद्ममन्तर्भ्रान्तालि किन्ते लोलेक्षणं मुखम्।**
**मम दोलायते चित्तमितीयं संशयोपमा।।२६।।**

यस्य मध्ये भ्रमराः भ्रमन्तः सन्ति एतादृशम् पद्मम् किम् अथवा लोले चञ्चले ईक्षणे यस्यतत् यस्मिन् तत् वा तव मुखमस्ति किम् ?

इति नायिका मुखे संशयस्य चमत्कारतया वर्णनात् संशयोपया।

१३. निर्णयोपमा-

**न पद्मस्येन्दु निग्राह्यस्येन्दुलज्जाकरी द्युतिः।**
**अतस्त्वन्मुख मेवेदमित्यसौ निर्णयोपमा।।२७।।**

चन्द्रेण यस्य निग्रहः संकोचनरूपः तिरस्कारः कृतः तादृशस्य कमलस्य शोभा चन्द्रं स्वजेतारम् कथं संकोचयेत् अत इदम् तव नायिकाया मुखमेव इति निर्णयः अतः अत्र निर्णयोपमा

१४. श्लेषोपमा-

**शिशिरांशु प्रतिस्पर्धि श्रीमत् सुरभिगन्धि च।**

**अम्भोजमिव ते वक्त्रमिति श्लेषोपमा स्मृता।।२८।।**

तव नायिकाया मुखम् कमलमिवेति श्लेषमुखेन वर्णित यथा-
शिशिरांशु प्रतिस्पर्धि-
मुखपक्षे शिशिरांशोः चन्द्रस्य प्रतिस्पर्धि कमलपर्क्षेतु-शिशिरांशुः प्रतिस्पर्धी यस्य तत्-
श्रीमत्- मुख-कमलपक्षेऽपि प्रशंसनीयया श्रिया शोभया युक्तम्
सुरभिगन्धि-मुख कमलपक्षेऽपि घ्राणतर्पणेन गन्धेन युक्तम्।
इत्थमत्र श्लेषानुप्राणितं सादृश्यम्। अतः श्लेषोपमा।

१५. समानोपमा-

**सरूपशब्दवाच्यत्वात् सा समानोपमा यथा।**
**बाले वोद्यानमालेयं सालकाननशोभिनी।।२६।।**

अर्थ भेदे विधमानेऽपि समानाकारेण शब्देन यत्र समानधर्मस्य प्रतिपादनम् तत्र समानोपमा यथा-
अत्र बाला-उद्यानमालयोः सादृश्यम् वर्णितन्तत्र च सालकाननशोभिनी इति समानधर्मशब्दः
बाला अलकैः चूर्णकुन्तलैः सहितेन आननेन शोभते तथा उद्यानमाला सालवृक्षाणां काननेन शोभते-
इत्थमत्र समानशब्दवाच्या समानोपमा।
अत्रायं विशेषः
उभयोः अर्थयोः उपस्थापकः शब्द सालकानन शोभिनी इत्यस्ति स च समानतां सरूपताम् एकानुपूर्वीत्वञ्च धारयति अतः समानोपमा श्लेषाद्भिन्ना।

१६. निन्दोपमा-

**पद्मं बहुरजश्चन्द्रक्षयी ताभ्याम् तवाननम्।**
**समानमपिसोत्सेकमिति निन्दोपमा स्मृता।।३०।।**

तव नायिकाया मुखम् धूलिपूर्णेण कमलेन क्षययुक्तेन चन्द्रेण च समानताम्
धारयति अतः गर्वयुक्तम्-
धूलियुक्तत्वम् क्षयश्च निन्दनीयौ दोषौ ताभ्यां युक्तमपि गर्वं करोति अतः
स्वयमपि निन्दनीयम् अतः निन्दोपमा।

१७. प्रशंसोपमा-

**ब्रह्मणोऽप्युद्भवः पद्मश्चन्द्रः शम्भुशिरोघृतः।**
**तौ तुल्यौ त्वन्मुखेनेति सा प्रशंसोपमेष्यते।।३१।।**

पद्मः विधातुः उत्पत्तिस्थानम् चन्द्रः शिवेन शिरोभूषणत्वेन मस्तके धारितः ताभ्यां प्रशंसनीयाभ्याम् पद्मचन्द्राभ्यां तव मुखम् तुल्यम् अतः स्वयमपि प्रशंसनीयम् जातम् अतः अत्र प्रशंसोपमा।

यत्र विपर्यासेन युक्तया उपमया समेधिता वृद्धिं प्राप्ता प्रशंसा, तत्र प्रशंसाया एवं प्रधानता अत विपर्यासोपमायाः विचित्रता, सा प्रशंसायाम् अन्तर्भूता अतः प्रशंसोपमा एव।

१८. आचिख्यासोपमा-

**चन्द्रेण त्वन्मुखं तुल्यमित्याचिख्यासु मे मनः।**
**स गुणो वास्तु दोषो वेत्याचिख्यासोपमां विदुः।।३२।।**

कामं भवन्तः स्वेच्छानुसारेण अस्माकम् आख्यानस्य कथनस्य अभिलाषं गुणं दोषं वा कथयेयुः, मम तु कथयितुम् उत्कटा इच्छा वर्तते यत् तव मुखम् चन्द्रेण तुल्यम्

अत्र आख्यानाभिलाषस्य उत्कटता अभिव्यक्ता-तेन मुखम् अतिचारू इति ध्वन्यते अतः अत्र आचिख्यासोपमा आख्यानेच्छाया प्रतीतिकारणात्।

१६. विरोधोपमा-

**शतपत्रं शरच्चन्द्रः त्वदाननमिति त्रयम्।**
**परस्पर विरोधीति सा विरोधोपमा यतः।।३३।।**

कमलं शारदः शशी नायिकामुखम् च इति त्रयमेव परस्पर विरोधयुक्तम्- यतः प्रायः समानविद्याः परस्परयशः पुरोभागाः इति सिद्धान्तोऽस्ति। अत्र विरोधमुखेन परस्पर समानता चमत्कारिणी अतः अत्र विरोधोपमा।

२०. प्रतिषेधोपमा-

**न जातु शक्तिरिन्दोस्ते मुखेन प्रतिगर्जितुम्।**
**कलंकिनो जडस्येति प्रतिषेधोपमैव सा।।३४।।**

चन्द्रः जडः शीतलः कलंकी मूर्खश्च अतः अकलंकिना अजडेन तव मुखेन प्रतिस्पर्धां कर्तुं न समर्थोऽस्ति। अत्र चन्द्रस्य प्रतिषेध ामुखेन सादृश्यं वर्णितम् अतः प्रतिषेधोपमा

२१. असाधारणोपमा-

**चन्द्रारविन्दयोः कान्तिमतिक्रम्य मुखन्तव।**
**आत्मनैवाभवत्तुल्य मित्यसाधारणोपमा।।३५।।**

अत्र तव मुखम् चन्द्र-कमलयोः शोभाम् अतिक्रम्य स्वेन एवं समानम् जातम् अर्थात् किमपि अन्यत् अस्य उपमानं भूत्वा तुलनां कर्तुं न शक्नोति अतः असाधारणतया सादृश्य वर्णनात् असाधारणोपमा।

आत्मान मात्मना वेत्ति इत्यादिवत्

काल्पनिकः भेदः तेन प्रयोगः सम्भवति।

२२. चटूपमा-

**मृगेक्षणाङ्कं ते वक्त्रम् मृगेणैवाङ्कितः शशी।**
**तथापि सम एवासौ नोत्कर्षीति चटूपमा।।३६।।**

तव मुखं मृगनयनतुल्याभ्याम् नयनाभ्याम् शोभितम् चन्द्रस्तु सम्पूर्णेन मृगेण एव अंकितः भूषितः तथापि चन्द्रः तव मुखेन तुल्य एव, न प्रकर्षशाली। अधिकसाधनशाली तु अधिकोत्कर्षशाली भवेदेव परन्तु एवं नास्ति इत्थमत्र चाटुकारस्य प्रियोक्तिरूपत्वात् चटूपमा।

२३. तत्त्वाख्यानोपमा-

**न पद्मं मुखमेवेदं न भृङ्गौ चक्षुषी इमे।**
**इति विस्पष्टसादृश्यात् तत्त्वाख्यानोपमैव सा।।३७।।**

इदम् समक्षम् दृश्यमानम् कमलं न किन्तु मुखमेव, न भ्रमरौ, इमे तु नेत्रे इति विधि निषेध-प्रकाशनमार्गेण सादृश्यम् प्रकटितम् अतः अत्र तत्त्वस्य आख्यानात् तत्त्वाख्यानम् इत्यनयो र्भेदः।

२४. अभूतोपमा-

**सर्वपद्मप्रभासारः समाहृत इव क्वाचित्।**
**त्वदाननं विभातीति ताम भूतोपमां विदुः।।३८।।**

एकत्र स्थाने विधात्रा एकत्रीकृत्य स्थापितः सर्वेषां कमलानां कान्तिपुञ्जः इव तव मुखम् शोभते इत्यत्र-अभूतेन अनिष्पन्नेन उपमानेन औपम्यस्य वर्णनम् अभूतोपमा

अत्रायं विशेषः- अत्र इव शब्दः सम्भावनायाम् न अपितु साधर्म्य वाचकः तेन समाहृत इत्यस्य संभावनया समाहरणेऽपि उत्प्रेक्षा-वाचकस्य अभावात् केवल संभावनाचमत्कृतेः अपेक्षया तादृश संभावनानिष्पन्नोपमानसादृश्यवर्णनचमत्कृतेः प्रधानता कारणात् अत्र उपमैव।

अविद्यमानस्य केवलं कविप्रतिभया कल्प्यमानस्य धर्मियो यत्र वर्णनम् तत्र अभूतोपमा,

स्वयम् विद्यमानस्य धर्मिणो यत्र अन्यधर्मिणाम् सम्मेलन कल्पनया साम्य-वैचित्र्यवर्णनम् तत्र अद्भुतोपमा इत्यनयोर्भेदः।

२५. असम्भावितोपमा-

**चन्द्रविम्बादिव विषं चन्दनादिव पावकः।**
**परूषा वागितो वक्त्रा दित्यसम्भावितोपमा।।३६।।**

अत्र उपमान भूताभ्याम् चन्द्र-चन्दनाभ्याम् विष-पावकनिर्गमनस्य इव तव वदनात् कठोराया वाण्या निर्गमनम् न संम्भवति-अतः अत्र असम्भावितोपमा-

२६. बहूपमा-

**चन्दनोदक चन्द्रांशु चन्द्रकान्तादिशीतलः।**
**स्पर्शस्तवेत्यतिशयं बोधयन्ती बहूपमा।।४०।।**

चन्दनमिश्रितं जलम् चन्द्रकिरणाः चन्द्रकान्तनामक मणिविशेषः इत्यादिवत् सुखकरः तव स्पर्शः। अत्र शीतलतोपमानरूपेण कदल्यादिकं वस्तु वर्तते परन्तु तस्मादपि प्रस्तुते अतिशयप्रतीतेः वर्णनात् बहूपमा

अर्वाचीना इमां मालोपमां कथयन्ति-"मालोपमा यदेकस्योपमानं बहु दृश्यते"

उदाहरणं यथा-

वारिजेनेव सरसी शशिनेव निशीथिनी।
यौवनेनेव वनिता नयेन श्रीर्मनोहरा।।

२७. विक्रियोपमा-

**चन्द्रबिम्बा दिवोत्कीर्ण पद्मगर्भादिवोद्धृतम्।**
**तव तन्वग्डि वदनमित्यसौ विक्रियोपमा।।४१।।**

अत्र उपमानभूतौ चन्द्रविम्ब-पद्मगर्भौ प्रकृतिभूतौ वदनञ्च विकृतिः। प्रकृति-विकृत्योश्च सादृश्यं वर्णितम् अतः विक्रियोपमा

अग्निपुराणेऽपि-

उपमान विकारेण तुलना विक्रियोपमा।

यथोक्तञ्चापि-

उपमेयस्य यत्र स्यादुपमान विकारता।

प्रकृतेर्विकृतेः साम्यात् तामाहुर्विक्रियोपमाम्।।

२८. मालोपमा-

**पूष्ण्यातप इवाह्नीव पूषा व्योम्नीव वासरः।**

**विक्रमस्त्वय्यधाल्लक्ष्मीमिति मालोपमा मता।।४२।।**

यथा प्रकाशः सूर्ये, सूर्यः दिने, दिनञ्च आकाशे लक्ष्मीम् आधात् तथैव पराक्रमः त्वयि लक्ष्मीं शोभां वा अधात्।

यथा मालायाम् ग्रथितस्य एकस्य पुष्पस्य द्वितीयेन पुष्पेण, द्वितीयस्य तृतीयेन सम्बन्धो भवति तथैव प्रथमवाक्ये अधिकरणरूपेण गृहीतस्य पदार्थस्य उत्तरे वाक्ये कर्तृरूपेण सम्बन्धः भवति तथैव अत्रापि उदाहरणे मालापुष्प-न्यायेन परस्पर सम्बन्धः अतः मालोपमा

अत्रायं विशेषः-

बहूपमायां केवलम् उपमान बाहुल्यम् भवति परन्तु मालोपमायां पूर्व वाक्यस्थस्य पदस्य उत्तरवाक्ये अन्वयः तथा तदनन्तरम् उपमानबहुलता भवति इत्यनयोर्भेदः।

नवीना स्तु उभ यत्र मालोपमामेव मन्यन्ते।

२६. वाक्यार्थोपमा-

**वाक्यार्थे नैव वाक्यार्थः कोऽपि यद्युपमीयते।**

**एकाने केव शब्दत्वात् सा वाक्यार्थोपमा द्विधा।।४३।।**

यदि कोऽपि वाक्यार्थः अन्येन वाक्यार्थेन उपमीयते तदा वाक्योंपमा वाक्यार्थयो रेव उपमानोपमेयभावः तेन साम्यस्य वर्णनात् वाक्यार्थोपमा-

सा द्विविधा-

(क) एकेव शब्द घटिता

(ख) अनेकेव शब्द घटिता

अत्रायं विवेकः-

यदा वाक्ये स्थितानां सर्वेषां पदार्थानां साम्यबोधनस्य इच्छा भवति तदा प्रत्येकम् उपमानेन सह इव शब्दः संयोज्यते तेन अनेकेव शब्द घटिता तथा

यदा प्रधानस्य पदार्थस्य अन्वयबोधे जाते पर्यालोचनानन्तरं अवान्तराणां पदार्थानाम् साम्यम् स्वतः प्रतीत मिव प्रतीयते तदा प्रधानेन उपमानेन सह एक एव इवशब्दों भवति तदा एकेव शब्द घटिता

(क) एकेव शब्द घटिता यथा-

**त्वदाननमधीराक्षमाविदर्शनदीधिति।**

**भ्रमद् भृंगमिवालक्ष्यकेसरं भाति पंकजम्।।४४।।**

अत्र चञ्चलनयनाभ्याम् प्रकाशमानया च दन्त कान्त्या सहितम् नायिका मुखम् इति एक वाक्यार्थ तथा भ्रमंणं कुर्वद्भिः भ्रमरैः सहितम् किञ्चिल्लक्ष्येण कि ञ्जल्केन सहितम् कमलम् इति द्वितीय वाक्यार्थः।

अनयो साम्यम् उपमानोपमेयात्मकेन वाक्यद्वयेन निबद्धम् तथा विशिष्टयोरेव उपमानोपमेयत्वस्य प्रतीतिः अभीष्टा अतः अत्र एकस्य इवशब्दस्य प्रयोगः तेन उक्तप्रकारा वाक्यार्थोपमा।

(ख) अनेकेव शब्द घटिता यथा-

नलिन्या इव तन्वंग्यास्तस्याः पद्मिवाननम्।

मया मधुव्रतेनेव पायम्पायमरम्यत।।

भ्रमरेण इव मया नायकेन पद्मलताया इव तस्याः कृशकायलतायाः सुन्दर्याः कमलम् इव मुखम् पीत्वा पीत्वा अरम्यत

इत्थमत्र भ्रमर-नायकसम्बद्धयोः द्वयो वाक्यार्थयोः सादृश्यम् अतिरमणीयम्। अत्र अनेकेषाम् इवशब्दानाम् प्रयोगः सर्वाग्डतया समतां बोधयति-

अतः अत्र उक्तप्रकारा वाक्यार्थोपमा।

३०. प्रतिवस्तूपमा-

वस्तु किञ्चिदुपन्यस्य न्यसनात्तत्स धर्मणः।

साम्य प्रतीतिरस्तीति प्रतिवस्तूपमा यथा।

किञ्च एकं प्रस्तुतं वस्तु किञ्चिद् वर्णयित्वा यदि तेन समानेन धर्मेण युक्तस्य अप्रस्तुतस्य वस्तुनः वर्णनं क्रियते तु प्रतिवस्तु

प्रतिपदार्थम् उपमा समानधर्मो यस्यां सा प्रतिवस्तूपमा उदाहरणं यथा-

**नैकोऽपि त्वादृशोऽधापि जायमानेषु राजसु।**
**ननु द्वितीयो नास्त्येव पारिजातस्य पादपः।।४७।।**

अत्र नृप सम्बद्धे पूर्ववाक्ये ''तव तुल्योनास्ति''-
कल्पवृक्ष सम्बद्धे द्वितीये वाक्ये च ''द्वितीयो नास्ति''
इत्येक एव सादृश्यस्य प्रतिषेधरूपः
धर्मः भिन्न-भिन्न प्रकारकेण शब्दसमूहेन निर्दिष्टः अतः अत्र प्रतिवस्तूपमा।

३१. तुल्ययोगोपमा-

अधिकेन समीकृत्य हीनमेक क्रियाविधौ।
यद् ब्रुवन्ति स्मृता सेयं तुल्ययोगोपमा यथा।।

यत्र न्यून गुणं पदार्थम् गुणाधिक पदार्थेन तुल्यं कृत्वा वर्णयन्ति तत्र हीनाधिकयोः तुल्यत्वेन योगे यदा उपमा सा तुल्ययोगोपमा उदाहरणं यथा-

**दिवो जागर्तिरक्षायै पुलोमारि र्भुवो भवान्।**
**असुरास्तेन हन्यन्ते सावलेपास्त्वया नराः।।४६।।**

अत्र हीनस्य प्रस्तुतस्य नृपस्य गुणाधिकेन महेन्द्रण सह तुल्यता प्रतिपादनात् तुल्ययोगोपमा

३२. हेतूपमा-

**कान्त्या चन्द्रमसं धाम्ना सूर्यधैर्येण चार्णवम्**
**राजन्ननुकरोषीति सैषा हेतूपमा मता।।५०।।**

अत्र राजा उपमेयभूतः उपमानभूताश्च चन्द्र-सूर्य सागराः तत्र अनुकरोषीति वाचकशब्देन सादृश्यं प्रतिपादितम् तत्र च क्रमेण हेतुभूता साधारणधर्मरूपाः कान्ति-तेजो-धैर्यात्मका अतः अत्र हेतूपमा इत्यलम्

**उपमादोष निरूपणम्-**

प्राचीन आलङ्कारिको भामहः उपमाया दोषसप्तकम् गणंयामास यथा-

**हीनताऽसम्भवो लिग्डवचोभेदो विपर्ययः।**
**उपमानाधिकत्वञ्च तेनासदृशताऽपि वा।।**
**त एत उपमादोषाः सप्तमेधाविनादिताः।।**

काव्यालंकार २-३६-४०

आचार्य वामनोऽपि-

हीनत्वाधिकत्वलिंगवचन भेदासादृश्या संभवास्तद्दोषाः।
वामनेन विपर्ययं वर्जयित्वा षड्दोषा मताः।

काव्यादर्शकर आचार्यदण्डी तु भामहेन उक्तेषु सप्तसु दोषेषु विपर्ययः असादृश्यम् असम्भव इति दोषत्रयं त्यक्त्वा दोषचतुष्टयमेव स्वीकृतवान् यतः ''यत्रोद्भूतं प्रतीयते सादृश्यम्'' इति उपमालक्षणम्, उद्भूते सादृश्यस्थले एषां न कोऽपि अवकाशः।

अवशिष्टानां चतुर्णाम् उपमादोषाणां विष्येऽपि दण्डिमतमस्ति यत्-

**न लिंगडवचने भिन्ने न हीनताधिकतापि वा।**
**उपमादूषणायालं यत्रोद्वेगो न धीमताम्।।**

यदि लिग्डभेदे वचनभेदे सत्यपि तथा हीनतायाम् अधिकतायामपि उपमानोपयेययोः सत्यामपि केनापि कारणेन धीमान् श्रोता जनः सामाजिको वा उद्वेगं न अनुभवेत्तु न दोषत्वम् अन्यथा उद्वेगानुभवे तु दोषत्वमेव लिग्डवचन भेदस्य अदोषता यथा-

**स्त्रीव गच्छति षण्ढोऽयं वक्त्येषा स्त्री पुमानिव।**
**प्राणाइव प्रियोऽयं में विद्या धनमिवार्जिता।।५२।।**

अयं क्लीवः स्त्री इव गच्छति
इत्यत्र क्लीब उपमेयः पुल्लिंग शब्दः
स्त्री इति उपमानभूतः स्वीलिग्डशब्दः।
एषा स्त्री पुमान् इव वक्ति-
इत्यत्र स्त्री इति स्त्रीलिंग शब्दः
पुमान् इति पुंलिंग शब्दः
एवं प्रकारेण वाक्यद्वये साधारण धर्मरूपेण गृहीता गमनक्रिया वचनक्रिया च।

अनयोः उपमानोपयेययोः भिन्नलिंगत्वेऽपि अन्वयो भवत्येव सुखपूर्वकम् तत्र विदुषाम् प्रतीति विधातजन्यस्य त्रासरूपस्य उद्वेगस्य न कोऽपि अवसरलेशः अतो न उपमादूषणम्

अयं जनो मे प्राणा इव प्रियः

तथा विद्या घनम् इव अर्जिता

इत्यत्रापि प्राणशब्दः नित्य बहुवचनान्तः घनञ्च नित्य नपुंसकम्

अतः अगतिकगति न्यायेन यथा प्राणाः प्रियाः तथा अयं मे प्रियः यथा च धनमर्जितं तथा विद्या अर्जिता

इत्यत्र द्वयो उदाहरणयो प्रथमे उदाहरणे वचनभेदः द्वितीये च पुनः लिंगभेदः पुनरपि सहृदयानां न कोऽपि उद्वेगः अतः न उपमा दोषत्वम्

उपमानस्य हीनतायाम् अधिकातायाम्

अदोषत्वं यथा-

**भवानिव महीपालः देवराजो विराजते।**
**अलमंशुमतः कक्षामारोढुं तेजसा नृपः।।५३।।**

अत्र नरपतिः मनुष्यरूपः अतः देवरूपात् इन्द्रात् हीनः पुनरपि नृपतिः देवांशो भवति अतः उपमाया न उद्वेगकरत्वम्।

अत्र जात्या अधिकः सूर्यः उपमानीकृतः परन्तु उपमेयो नृपः अपि देवांशसम्भवः अतः विदुषाम् न कोऽपि उद्वेगः अतः अत्र न कोऽपि दोषः उपमायाः स्वीक्रियते।

उपसंहारः

**इत्येवमादौ सौभाग्यं न जहात्येव जातुचित्।**
**अस्त्येवं क्वचिदुद्वेगः प्रयोगे तद्विदां यथा।।५४।।**

पूर्वोक्तेषु उदाहरणेषु लिंगवचनभेदे सत्यपि हीनत्वे अधिकत्वे चापि विचित्रता न नश्यति अतः न उपमा दोषस्तथा अग्रे सहृदय हृदयेषु उद्वेगः जायते अतः उपमादोषत्वमेव यथा-

**हंसीव धवलश्चन्द्रः सरांसीवामलं नभः।**
**भर्तृभक्तो भटः श्वेव खद्योतो भाति भानुवत्।।५५।।**

अत्र उपमानोपमेययोः हंसीचन्द्रयोः लिग्ड भेदः,सरांसि इति उपमानं बहुवचनम्-नभ इति उपमेयम्-एकवचनम् इति वचनभेदः।

अत्र उपमानभूतः कुक्कुरः निकृष्टजातिः तेन स्वामिभक्तस्यापि उपमेयस्य अपकर्षः प्रतीयते। खधोत उपमेयः उपमान भूतश्च सूर्यः तस्माद् अधिकः किम् अतिमहान् पुनरपि अत्र सर्वत्र सादृश्यम् वर्णितम् तच्च सहृदयहृदेषु उद्वेग जनकम् अतः उपमादूषणाम्।

गुणग्रहणे-दोष वर्जने च दण्डिसदुपदेशो यथा

**ईदृशं वर्ज्यते सद्भिः कारणन्तत्र चिन्त्यताम्**
**गुणदोष विचाराय स्वयमेव मनीषिभिः।।**

पूर्वोक्तानि उपमा दूषणानि काव्यशास्त्र मर्मज्ञैः पण्डितैः त्यागयोग्यानि तत्र दोषत्यागे कारणं किमस्ति इत्यत्र तु-सचेतसामनुभवः प्रमाणम् यत्र अनुभवे मन्थरता अपकर्षो जायते।

मनीषिणः गुणदोष विचाराय दूषकतायां बीजं स्वयमेव विचारयन्तु।

**उपमावाचकाः शब्दाः**

**इव वद्वा यथा शब्दाः समानिनिभसन्निभाः।**
**तुल्यसंकाशनीकाश प्रकाश प्रतिरूपकाः।।**
**प्रतिपक्ष प्रतिद्वन्द्वि प्रत्यनीकविरोधिनः।**
**सदृक् सदृश संवादि सजातीयानुवादिनः।।**
**प्रतिविम्ब प्रतिच्छन्न सरूप समसम्मिताः।**
**सलक्षणसदृक्षाभ सपक्षोपमितोपमाः।।**
**कल्पब्देशीय देश्यादिः प्रख्यप्रतिनिधिअपि।**
**सवर्णतुलितौ शब्दौ ये चान्यूनार्थवादिनः।।**
**समासश्च बहुव्रीहिः शशांक वदनादिषु।**
**स्वर्धते जयति द्वेष्टि द्रुह्यति प्रतिगर्जति।।**
**आक्रोशत्यव जानाति कदर्थयति निन्दति।**
**विडम्बयति सन्धत्ते हसतीर्ष्यत्यसूयति।।**
**तस्य मुष्णाति सौभाग्यम् तस्य कान्तिं विलुम्पति।**
**तेन सार्धं विगृह्णाति तुलां तेनाधिरोहति।।**
**तत्पदव्यां पदं धत्ते तस्य कक्षां विगाहते।**
**तमन्वेत्यनुबघ्नाति तच्छीलंतन्निषेधति।।**
**तस्य चानुकरोतीति शब्दाः सादृश्यसूचकाः।**

**उपमायामिमे प्रोक्ताः कवीनां बुद्धि सौख्यदाः।।**

पूर्वं गणिताः शब्दाः सादृश्यसूचका उपमा वाचका वा सन्ति। एषु अभिधया लक्षणया त्यञ्जनया च सादृश्य प्रकाशनस्य सामर्थ्य वर्तते यथा–

इव वद्वा यथा दयः शब्दा अभिधा द्वारा उपमा वाचकाः

तुल्यादयः शब्दा सादृश्ये न शक्ता अपितु सादृश्यविशिष्टे शक्ता अतः तैः

अर्थसादृश्यस्य प्रतीतिर्भवति।

निषेधति असूयति–इत्यादयः सादृश्यलक्षकाः तथा अनुकरोति–इत्यादयः सादृश्यव्यञ्जकाः सन्ति। कवीनां बुद्धिसुखाय सञ्चय एषः।

क्रमेण सप्त षष्टि शब्दानामुदाहरणानि यथा–

१. इव– हंसीव कृष्णते ते कीर्तिः स्वर्गग्डामवगाहते।।

२. वत्– तद्धितप्रत्ययोऽयं द्विप्रकारकः तत्र तस्येव–तेन तुल्यं क्रिया चेद्वतिः

**गाम्भीर्य गरिमा तस्य सत्यं गंगाभुजंगवत्।**

**दुरालोकः स समरे निदाधाम्बररत्नवत्।।**

३. वा– मणी वोष्ट्रस्य लम्बेते प्रियौ वत्सतरौ मम।

४. यथा– **धन्यस्यानन्य सामान्य सौजन्योत्कर्षशालिनः।**

**करणीयं वचश्चेतः सत्यं तस्यानृतं यथा।।**

५. समान– **भुजे भुजग्डेन्द्रसमानसारे भूयः स भूमेर्धुरमाससञ्ज।।**

६. निभ– प्रबुद्धपुण्डरीकाक्षम् बालातपनिभांशुकम्।

७. सन्निभ– भगवान् यज्ञपुरूषो जगर्जगेन्द्रसन्निभः।

८. तुल्य– अवेहि मां किंकरमष्टमूर्तेः

कुम्भोदरं नाम निकुम्भ तुल्यम्।

९. संकाश– विमाने सूर्यसंकाशे रघुराजो व्यराजत।

१०. नीकाश– **आकाश्नीकाशतटां नीरवानीरसंकुलाम्।**

**बभूव चरतां हर्षः पुण्यतीर्थाम् सरस्वतीम्।।**

११. प्रकाश– चन्द्रप्रकाशं वदनं तरूण्या भाति सुन्दरम्।

१२. प्रतिरूपक– वाग्भिः सुधायाः प्रतिरूपकाभिः तनोति मोदं हृदयेऽनिशं या।

१३. प्रतिपक्ष– पंकेरूह श्री प्रतिपक्षभूत– नेत्रप्रभाभिः स्पृहणीय शोभम्।

१४. प्रतिद्वन्द्वि– चन्द्रप्रति द्वन्द्वि बाला– मुखं निशायां ललितोत्सवेषु।

१५. प्रत्यनीक– कामस्य प्रत्यनीकोऽयम्।

१६. विरोधिन्– त्वं रतेश्च विरोधिनी

१७. सदृक्– न त्वया सदृगन्योऽस्ति त्रैलोक्येऽपि मनोरमः।

१८. सदृश– सुधाकरश्रीसदृशी च कीर्तिः

१९. संवादी– विभाति बाला वदने स्मित श्रीः संवादिनी शारद चन्द्रिकायाः।

२०. सजातीय– कृष्णा गुरू सजातीयम्

२१. अनुवादी– पीयूषस्यानुवादिनम्

२२. प्रतिविम्ब– चन्द्रस्य प्रतिबिम्बं सत्सग्ड सन्तापहं श्रये।

२३. प्रतिच्छन्द– जामदग्न्य प्रतिच्छन्दः

२४. सरूप– सरूपो यः किरीटिनः

२५. सम्मित– सम्मितो रघुनाथस्य रघुराजो विराजते

२६. सम– पाणिः पल्लवेन समस्तव।

२७. सलक्षण– इन्दुसलक्षणवदने

२८. सदृक्ष– सुधासदृक्षोऽधरस्य रसः

२९. आभा– ज्योत्स्नाभाः स्मितमधुराः नर्मालापाः

३०. सपक्ष– दलद् द्राक्षनिर्यद्रसभर सपक्षा भणितयः

३१. उपमित– राक्षसोपमिता वाग्भिः खला दीनां स्तुदन्त्यलम्।

३२. उपमा– साधवस्तोषयन्त्यन्यां– स्ताभिरेव सुरोपमाः।

३३. कल्प– पूर्णेन्दु कल्पवदना

३४. देश्य- मृणाली देश्य दोर्लता

३५. देशीय- चक्रदेशीय जघना सा स्वप्नेऽपि न दृश्यते।

३६. प्रख्य- गुप्तमभ्रचयप्रख्यैर्गोपुरै र्मन्दरोपमैः

३७. प्रतिनिधि- **भयोत्सृष्ट विभूषाणां तेन केरलयोषिताम्।**
**अलकेषु चमूरेणुश्चूर्णप्रतिनिधिः कृतः।।**

३८. सवर्ण- ग्रथितमौलिरसौ वनमालया तरूपकाश सवर्ण तनुच्छदः

३६. तुलित- मुखं श्लेष्मागारं तदपि च शशांकेन तुलितम्

४०. अन्यूनार्थका अनून- अहीनादयः

(क) अन्यून- सुधाऽन्यूनानि गंगाजलानि।

(ख) अनून- अमृतानून रसाधरा प्रिया

(ग) अहीने- अहीनं चन्द्रमण्डलात् तन्मुखम्

४१. बहुव्रीहिसमास- कमलकरा करभोरूः कुबलयनयना

४२. कर्मधारयसमास- शोणाधरांशु सम्भिन्नास्तन्वि वदनाम्बुजे

४३. स्पर्धते- स्पर्धते रूद्धमद्धैर्यो वरामा मुखानिलैः

४४. जयति- जिगाय जम्बूजनित श्रियः श्रियं सुमेरूशृंगस्य तदा तदा सनम्।

४५. द्वेष्टि- राधामुखं द्वेष्टि सुधाकरः तत्पापेन लोके दधते कलंकम्।

४६. द्रुह्यति- द्रुह्यन्ति तल्लोचनमम्बुजानि ततो निमीलन्ति निशासु तानि।

४७. प्रतिगर्जति- न जातु शक्तिरिन्दोस्ते मुखेन प्रतिगर्जितुम्।

४८. आक्रोशति- अम्बुजमा क्रोशति ते मुखम्

४६. अवजानाति- अवजानातिते वक्त्रं पद्मं नेयं कथा मृषा

५०. कदर्थयति- कदर्थयति कान्तायाः मुखं मे फुल्ल पंकजम्

५१. निन्दति- निन्दत्य धरश्च बन्धूकम्

५२. विडम्बयति- स एवमुक्त्वा मघवन्तमुन्मुखः करिष्यमाणः सशरं शरासनम्
अतिष्ठदालीढ विशेषशोभिना वपुः प्रकर्षेण विडम्बितेश्वरः।।

५४. हसति- अकलंकतया वक्त्रं हसतीन्दुं कलंकिनम्

५५. ईर्ष्यति- ईर्ष्यति कोऽपि चेष्टायै चपलयतियो यदीयदुश्चरितम्

५६. असूयति- नित्यमसूयति वानर वदनाय नमः खलाय शतशस्ते

५७. तस्य मुष्णाति सौभाग्यम्

५८. तस्य कान्तिं विलुम्पति स्वत एवं उदाहरणानि इमानि षड् वाक्यानि

५६. तेन सार्ध विगृह्णाति

६०. तुलां तेनाधिरोहति

६१. तत्पदव्यां पदं धत्ते

६२. तस्य कक्षां विगाहते

६३. तमन्वेति-पद्ममन्वेति ते मुखम्

६४. तमनुबध्नाति-शशांकमनुबध्नाति मुखमित्यमृषा कथा

६५. तच्छीलम्- शीलन्धत्ते पयोजस्य राधाचरणयो र्युगम्।

६६. तन्निषेधति- निषेधति मुखं बाले तव फुल्लं कुशेशयम्

६७. तस्यानुकरोति- सर्व देवमयस्य प्रकटित विश्वरूपाकृंतेनुकरोति भगवतो नारायणस्य

<u>अत्रांय विशेषः</u>-

इदं खलु उपमावाचक शब्दानां परिगणनं नास्ति निदर्शन मात्रमिदम् एतदतिरिक्ते रूपेऽपि उपमा प्रकाशिता भवति यथा-

१. अनुहरति- अनुहरति मनोजबाणलक्ष्मीं सुभगतनो तव चञ्चलः कटाक्षः

२. सहाधीति- अवधृत्य दिवोऽपि यौवतै र्न सहाधीतवती मिमामहम्

३. सतीर्थ्य- कमलसतीर्थ्य वदनम् कुमुदसहाध्यायिनो हासाः-इत्यलम्

इति महाकवि दण्डि विरचिते काव्यादर्श-द्वितीय-परिच्छेदे उपमाचक्रम्।